संस्कृतकादम्बरीकथा

8647

BĀNA'S KĀDAMBARĪ

abridged, simplified and re-told in the words of the original

पु। 12।२००।



जाबालिः— श्रूयतां शुककथा, यदि कुतूहलम्। [पृ. ७७]

N. S. Navare

R3-107

LIBCAT


Call_Number	VII·A
Subject_Name	Classical Lit.
SubSubject_Name	Sanskrit Poetry
Language_Name	Sanskrit
Size_TypeDesc	A
Number_of_Pages	4+103+2+
Binding_Type	☐ Paperback ☑ H
Book_Type	☑ Text ☐ Ref ☐
Acquisition_Method	☐ Local Vender ☑ I
Acquisition_Type	☑ Presented ☐ ☐ Review ☐ E
Copy_Type	☑ Printed ☐ Ph
Donated_By	

VII.17

संस्कृतकादम्बरीकथा

BĀṆĀ'S KĀDAMBARĪ

abridged, simplified and retold in the words of the original



BY

anth Shankar Navare, B. A. (Hons.), B. T.
krit Teacher, Northcote High School, Sholapur

Author of

कवींचीं नाट्यकथानकें, मराठी कादंबरीकथा and
मराठी रघुवंशकथा

1935

Price As. 10

Printed and Published by Laxman Narayan Chapekar,
at the Āryasaṃskṛti Press, 198(17) Sadashiv Peth,
Tilak Road, Poona City.

TO

My dear friend

Keshav Lakshman Ogale, B. A.

Bombay



श्रीः

प्रस्तावः

(By **Pandit Mahāmahopādhyāya Vasudeo-shastri Abhyankar,** Poona.)

सुप्रथितमेवैतत्तत्रभवतां संख्यावतां यदियं नायिकानाम्ना प्रसिद्धा कादम्बरी ललितशृङ्गाररसप्रधानाऽप्युपसर्जनीभूतवीराद्भुत-शान्तकरुणरससमाश्लिष्टा उपमाश्लेषरूपकाद्यखिलालंकारविलसिता विनेयार्जवादिधीरललितनायकनायिकागुणमण्डिता चेतश्चमत्कृति-दानशौण्डार्थवर्णनचातुरीसमुद्भासिता च विजयते । विजयते-तरां च तादृशकाव्यनिर्माता सकलकविकुलोपजीव्योपज्ञो बाण-भट्टाख्यः कविराज इति । दीर्घदीर्घतराणि तत एव च निरस्त-गाम्भीर्याणीव बहुतरसमासबहुलत्वात्क्लिष्टार्थकानीव च प्रति-भासमानानि नैकशो विशेषणादिपदानि सकलान्यपि साभि-प्रायाण्येव नत्वेकमप्यपुष्टार्थकम् । किन्तु यथा तादृशकाव्यनिर्मा-णोपयोगिनिखिलगुणगणमण्डितो गभीरप्रज्ञः कविकुलजीवातुरेक एव बाणभट्टस्तथा तद्रचीगुम्फरहस्याभिज्ञो वाचकोऽपि सांप्रतं विरलं एव दृष्टिपथमारोहति । हन्तेदानीमुत्तानबुद्धयः केचित् श्रीबाणभट्टाशयाकलनसमर्थसमुचितसंस्कारविशेषशून्यान्तःकरणाः स्वाज्ञानदोषं क्लिष्टा नीरसा निरस्तार्थसौन्दर्या चेत्येवमादिभी रूपान्तरैर्विपरिवर्त्य तान् दोषान् कादम्बर्यां समारोप्य तद्द्वारा श्रीबाणभट्टे दोषारोपं कर्तुं न बिभ्यति । एवमालोच्य **समासप्रचु-राणि दीर्घतराणि च यावन्ति विशेषणान्युत्सृज्या-**

वशिष्टानि ऋज्वर्थानि लघूनि च पदानि तत्प्रणीतान्येवादाय, विपर्यस्य च सुखबोधानुसारेण कथासंदर्भपौर्वापर्यं, संगृहीतेयं 'संस्कृतकादम्बरीकथा'। तेन मन्ये दुरवगाहबाणकविगर्वापाथोनिधावतरितुमनुत्तमायाः सोपानततेः प्रथमं पर्वभिर्नवरे इत्युपाह्वैर्नीलकण्ठशर्मभिर्विनिर्मिताभाति। मन्ये च

द्रष्टुचेतसि संस्कारविशेषजनका इमे।
कादम्बरीं बाणभट्टं दोषारोपादमोचयन्॥

मनोरथश्चायं सफलीभवत्वित्याशासे—

वासुदेवशास्त्री अभ्यंकरोपाह्वः

PREFACE

The present book is an offshoot of my labours on Bāṇa's Kādambarī, which first took the form of an abridged and re-arranged story in Marathi—मराठी कादंबरी-कथा published in 1929. The book was well received, and some friends, particularly my teacher, the late Mr. M. P. Oka, the well-known Sanskritist of Poona, strongly impressed upon me the advisability of publishing a similar book in Sanskrit, which would meet a need, keenly felt by teachers and students of that language in secondary Schools. I have, therefore, followed the plan of my Marathi book in writing the following pages. I have tried to abridge the great work of Bāṇa without impairing the beauty of the original. The special features of the book are the following:—

(1) The story is told in its natural order, the three births of the different characters having been taken in their proper sequence. Thus the heroine Kādambarī is introduced at the outset and S'ūdraka comes last.

(2) The book is divided into 36 chapters with suitable headings.

(3) I have exercised the right of omission rather than that of addition, that is to say, have added nothing of my own and have preserved the very wording of the original.

(4) With the object of making the meaning easily intelligible even to the beginner, and facilitating the loud reading of the book, I have mostly refrained from joining words together according to the rules of Saṁdhi, especially where there is a natural pause.

(5) The bulk is reduced to about $\frac{1}{8}$th of the original.

(6) The सुभाषितs are printed in bold type and they are collected at the end.

(7) The book is illustrated with sketches in black and white.

(8) Such matter as appeared to be unsuitable for young readers has been omitted.

In short, it will be seen that this book differs from Apte's Kādambarīsāra, which, though admirable as an abridgment, does not aim at achieving the other objects which I have had in view. Even in Colleges the Kādambarī is not studied as a whole but only in parts. It is also my experience that Kadambarīsāra too is not gone through beyond a few pages in schools. This deprives the students of the story-interest of the famous romance. I am sure, the present attempt will create and sustain the interest of the reader in the narrative as a whole. It is a complete reading-book and can be used in higher classes of High Schools and even by F. Y. students in Colleges.

A word about the notes. I have steadily kept in view the needs of an average Matriculation student.

I found out where the difficulties of students lay by supplying my students in the Matriculation class with printed forms of the book and asking them to mark their difficulties. These I have tried to solve in my notes, mostly in Sanskrit.

By the bye, I think it necessary here to sound a note of warning to the students. An अनुस्वार has been printed in some places instead of the appropriate nasal consonant. Students will do well not to imitate it. I wish to leave no ground for complaint on this score in my next edition of the book.

Much need not, I hope, be said with regard to the necessity and utility of a book like this. It conforms to the present Matriculation regulations and may serve as an introduction to the advanced study of Sanskrit literature, like the many series of ' Re-told Classics ' in English. I trust it will be found useful not only by School and College students but by the Sanskrit reading public as well.

Lastly, I have to express my sincere thanks to Messrs. R. D. Desai, B. A., author of Saṃskṛta-praves'a, K. L. Ogale, B.A., Bombay, B. B. Kamat, B.A., B. Sc., Head Master, N. H. School, Sholapur, Prof. G. P. Patawardhan, M. A., retired Head-master, H. D. High School, Sholapur and Dr. V. G. Paranjpe, Professor of Sanskrit, Fergusson College, Poona, for the help that I received from them from time to time. I am also indebted to Mr. G. K. Modak, Sanskrit teacher,


E. School, Poona, who, with his usual vigilance, was kind enough to go through the proof-sheets and make very important suggestions.

It is difficult, however, to express fully my grateful feelings for my Guru, Mahāmahopādhyāya Vāsudeo-shastri Abhyankar. He cheerfully responded to my request to favour me with a foreword to this book, which is both a blessing and an encouragement to me for further efforts in this direction.

My thanks are due to the management of the Āryasaṃskṛti Press for printing the book to my satisfaction.

Sholapur,
15th may 1935

N. S. Navare



बाणभट्ट *

Few Sanskrit writers of eminence have left us any reliable record of their lives, but बाण is a remarkable exception to this rule. In his well-known work हर्षचरित and the introductory verses of कादम्बरी he has given an interesting account of his own life and his family-history. The following sketch of बाण's life is mainly based upon what he has said about himself in those works.

बाण lived in the seventh century. He spent his boyhood in प्रीतिकूट, an obscure village to the west of the river शोण in the United Provinces. When very young he lost his parents. But not being disheartened by this calamity he studied hard and mastered various branches of learning. He then travelled over भारतवर्ष, visited many royal courts, attended several universities (गुरुकुलs), conversed with learned men, took part in debates and returned home with a rich store of wisdom and experience.

बाण's reputation now began to spread far and wide. श्रीहर्ष, the great emperor and patron of learning, hearing about बाण, invited him to his Court and received him with great honour. Before long, बाण won his favour and became his court poet.

श्रीहर्ष has been doubly immortalised, by his own achievements and by the biography (हर्षचरित) which बाण has left us. In this work we get a lively picture of the king's court and his exploits and also many interesting glimpses of the customs and manners of those far-off times.

---

* प्रागल्भ्यमधिकमाप्तुं वाणी बाणो बभूवेति। —गोवर्धन

Two other works which are attributed to बाण are– a dramatic piece–पार्वतीपरिणय and चण्डीशतक–a collection of a hundred verses in praise of चण्डी or दुर्गा. But बाण is not known for great poetic gifts and his fame chiefly rests on his prose works.

The कादम्बरी* is the fruit of बाण's mature genius. It is the best prose work in Classical Saṁskṛta. Its plot is based upon the story of मकरंदिका in the collections known as बृहत्कथा of गुणाढ्य. But the dull and unattractive material of the original has been transformed by the genius of बाण into a work of fascinating beauty.

बाण had scarcely finished half his work when he died prematurely. One wonders if the curse upon a principal character in the कादम्बरी that he should not have his wish fulfilled until he passed through another birth, had fallen upon the author himself! But luckily for us, बाण's son, भूषणभट्ट, who was every way worthy of his great father, took up the story, where बाण had left it unfinished and carried it cleverly to its natural close. On the very first anniversary of his father's death, he gave this great romance to the world in its complete form. Thus is the truth of the old saying– आत्मा वै पुत्रनामासि–* realised in this work, which was begun by father and finished by son. It would not be an exaggeration to say that such an occurrence is unique in the history of Saṁskṛt literature.

---

* युक्तं कादम्बरीं श्रुत्वा कवयो मौनमाश्रिताः। —कीर्तिकौमुदी

* One reproduces oneself in one's son. (Literally— Thou art my self, re-named as son.)

अनुक्रमणिका

पृष्ठम्

प्रथमो विभागः

१ सखीद्वयम् १
२ मालाविपर्ययः २
३ पुण्डरीकपत्रम् ५
४ मित्रदौत्यम् ६
५ तपस्विनी महाश्वेता ८
६ परस्परशपनम् ११

द्वितीयो विभागः


७ विलासवतीतारापीडौ १२
८ चन्द्रापीडावतारः १४
९ चन्द्रापीडस्य विद्याग्रहवासः १६
१० चन्द्रापीडस्य प्रत्यावर्तनम् १७
११ चन्द्रापीडस्य मृगया-विनोदः २१
१२ पत्रलेखा २२
१३ शुकनासोपदेशः २३
१४ यौवराज्याभिषेकः २५
१५ दिग्विजयः २५
१६ महाश्वेतादर्शनम् २८
१७ कादम्बरीचन्द्रापीडौ ३६
१८ शेषहारविस्मृतिः ४०

पृष्ठम्

१९ तारापीडपत्रम् ४२
२० जरद्द्रविडधार्मिकः ४३
२१ उज्जयिनीप्रत्यागमनम् ४३
२२ केयूरकागमनप्रयोजनम् ४५
२३ चन्द्रापीडः वैशंपायनं प्रत्युद्गच्छति ४८
२४ कस्य दोषः ? ५१
२५ वैशंपायनप्रत्यानयन-प्रयत्नः ५४
२६ वैशंपायनान्वेषणम् ५६
२७ किमाश्चर्यम् अतःपरम् ? ५९
२८ ततः किम् ? ६३
२९ पुत्रशोकः ६६
३० सर्वेऽपि प्रतिष्ठन्ते ६९

तृतीयो विभागः

३१ शुकशावकः ७२
३२ जाबालेराश्रमः ७५
३३ शुककपिञ्जलौ ७९
३४ चाण्डालकन्यका ८१
३५ राजा शूद्रकः ८५
३६ शापावसानम् ८८



पात्राणि


कादम्बरी— नायिका; चित्ररथगन्धर्वस्य कन्या
महाश्वेता— उपनायिका; कादम्बर्याः सखी
चित्ररथः— कादम्बर्याः पिता
मदिरा— कादम्बर्याः माता
हंसः— महाश्वेतायाः पिता
गौरी— महाश्वेतायाः माता
चन्द्रापीडः— नायकः; उज्जयिन्याः युवराजः; तारापीडस्य पुत्रः
पुण्डरीकः— उपनायकः; श्वेतकेतोः पुत्रः
कपिञ्जलः— ऋषिकुमारः; पुण्डरीकस्य मित्रम्
तारापीडः— उज्जयिन्याः राजा; चन्द्रापीडस्य पिता
विलासवती— तारापीडस्य पत्नी
शुकनासः— तारापीडस्य प्रधानः
मनोरमा— शुकनासस्य पत्नी
वैशंपायनः— शुकनासस्य पुत्रः; चन्द्रापीडस्य मित्रम्
(पुण्डरीकस्य अवतारः)
इन्द्रायुधः— चन्द्रापीडस्य अश्वः (कपिञ्जलस्य अवतारः)
पत्रलेखा— चन्द्रापीडस्य दासी (रोहिण्याः अवतारः)
मदलेखा— कादम्बर्याः दासी
तरलिका— महाश्वेतायाः दासी
केयूरकः— कादम्बर्याः वीणावाहकः
मेघनादः— तारापीडस्य सेनापतिः
शुकः— (वैशंपायनस्य अवतारः)

जाबालिः— महर्षिः
श्वेतकेतुः— महर्षिः
हारीतः— जाबालेः पुत्रः
चाण्डालकन्या— (पुण्डरीकस्य मातुः लक्ष्म्याः रूपान्तरम्)
शूद्रकः— उज्जयिन्याः राजा (चन्द्रापीडस्य अवतारः)

पुनर्जन्म

(१) चन्द्रः	पुण्डरीकः	कपिञ्जलः	रोहिणी
|	|	|	|
(२) चन्द्रापीडः	वैशंपायनः	इन्द्रायुधः	पत्रलेखा
|	|		
(३) शूद्रकः	शुकः		

संस्कृतकादंबरीकथा



प्रथमो भागः

१ सखीद्वयम्

अस्ति कैलासमुत्तरेण नातिदूरे हेमकूटो नाम गिरिः। देवगायकानां गन्धर्वशतसहस्राणां स एव अधिवासः। तत्र चैत्ररथं नाम अतिमनोहरं काननमासीत्। तच्च गन्धर्वराजेन चित्ररथेन निर्मितम्। अस्य मध्ये अच्छोदाभिधानं अतिमहत् सरः तेनैव खानितम्। तस्य च उत्तरतो भगवतो भवानीपतेरायतनमुपरचितम्। गन्धर्वाः अच्छोदसरसि स्नातुं कैलासनाथमुपासितुं च प्रत्यहं तत्रागच्छन्।

चतुर्दश कुलानि गन्धर्वाणाम्। एकं अग्नेः उद्भूतम्। अन्यद् जलात् जातम्। अपरं पवनात् प्रसूतम्। इतरद् अर्ककिरणेभ्यो निर्गतम्। एवं अन्यान्यपि सोमामृतदक्षादिभ्यः संभूतान्यासन्। दक्षस्य प्रजापतेः मुनिः अरिष्टा चेति द्वे सुते बभूवतुः। तत्र मुनेस्तनयः चित्ररथो नाम सर्वेषां गंधर्वाणां आधिपत्यं शैशवे एव प्राप्तवान्।

चित्ररथः किल देवाधिदेवस्य परमः सुहृद् बभूव। स च मदिरायाः नाम कन्यकायाः पाणिमग्रहीत्। तयोः कादम्बरी नाम दुहितृरत्नं जज्ञे।

अरिष्टायास्तु पुत्रो हंसो नाम। स गौरीनाम्नीं कन्यां उपयेमे। तयोः महाश्वेता नाम यथार्थनाम्नी आत्मजा समुत्पन्ना। हंसस्तु अनपत्यतया सुतजन्मवत् तज्जन्म अभिनन्दितवान्। महा-

श्वेतायाः जन्मनः प्रभृति परं प्रेमस्थानं कादम्बरी द्वितीयमिव हृदयमासीत्। तयोः एकत्रैव नृत्यगीतादिकलासु परिचयो जातः। एकासनशयनपानाशनेन शिशुजनोचिताभिश्च क्रीडाभिः ताभ्यां अपनीतो बालभावः।

---

२ मालाविपर्ययः

अथैकदा महाश्वेता मधुमासदिवसेषु अम्बया सह अच्छोदं सरः स्नातुमभ्यगात्। तत्र स्नानार्थमागतेन सह सखीजनेन, 'रम्योऽयं लतामण्डपः, अतिरमणीयमिदं तीरतरुतलं' इति व्याहरन्ती दर्शनलोभेन च विचरन्ती, एकस्मिन् प्रदेशे अनाघ्रातपूर्वं कुसुमगन्धमभ्यजिघ्रत्। 'कुतोऽयं' इति उपारूढकौतुका तेन कुसुमगन्धेन मधुकरीव आकृष्यमाणा, कतिचित् पदानि गत्वा स्नानार्थमागतं कंचन मुनिकुमारकमपश्यत्। तेन च कर्णावतंसीकृतां अदृष्टपूर्वां कुसुममञ्जरीं अद्राक्षीत्।

अदूरकोपा मुनिजनप्रकृतिः इत्यवधार्य, कुसुमानि उच्चिन्वन्तं तस्य सहचरं मुनिबालकं महाश्वेता प्रणामपूर्वकं अपृच्छत्। 'भगवन्, किमभिधानः कस्यायं तपोधनयुवा? किंनाम्नश्च तरोः इयं कुसुममञ्जरी? जनयति हि मे मनसि महत् कौतुकं अस्याः असाधारणसौरभम्'। स तु विहस्य तामब्रवीत्। 'बाले, किमनेन पृष्टेन प्रयोजनम्? अथ कौतुकं, आवेदयामि। श्रूयताम्।

'अस्ति खलु सुरासुरवन्दितचरणयुगलो महामुनिः, दिव्यलोकनिवासी, रूपेणाप्रतिमः, श्वेतकेतुर्नाम। स कदाचित् कमलान्युद्धर्तुं मन्दाकिनीमवततार। अवतरन्तं च तं तदा सरसि

कमलवनेषु संनिहिता पुण्डरीकोपविष्टा देवी लक्ष्मीः ददर्श। लक्ष्म्या च दृष्टमात्रे तस्मिन् मुनिवरे तस्मात् पुण्डरीकात् कुमारः समुत्पन्नः। ततः तं उत्सङ्गे आदाय सा "भगवन्, गृहाण तवायं आत्मजः" इत्युक्त्वा तस्मै श्वेतकेतवे ददौ। असावपि बालजनोचिताः सर्वाः तस्य क्रियाः कृत्वा तस्य पुण्डरीकसंभवतया तदेव पुण्डरीक इति नाम चक्रे। सोऽयम्।

'इयं च मञ्जरी पारिजातनाम्नः पादपस्य। अद्य मया सह नन्दनवनसमीपं अनुसरन् अयं नन्दनवनदेवतया पारिजातकुसुममञ्जरीं इमां आदाय प्रणम्य अभिहितः। "भगवन्, तवाकृतेः सुसदृशः अयं अलंकारः" इत्याभिधाय तया अस्य अनिच्छतः अपि बलादियं कर्णपूरीकृता।

इत्युक्तवति तस्मिन् स तपोधनयुवा किंचिदुपदर्शितस्मितः तां प्रत्यवादीत्। 'अयि कुतूहलिनि, किं अनेन प्रश्नायासेन? यदि रुचितसुरभिपरिमला, गृह्यतां इयम्'। इत्युक्त्वा समुपसृत्य आत्मीयात् श्रवणात् तां अपनीय तस्याः श्रवणपुटे तां अकरोत्। तदा तत्करतलस्पर्शेन तस्याः गात्रं पुलकितं आसीत्। तत्कपोलतलस्पर्शात् तरलांगुलेः पुण्डरीकस्यापि करतलात् लज्जया सह अक्षमाला गलिता। स तु तां नाज्ञासीत्। अथ महाश्वेता भूतलं असंप्राप्तामेव तां अक्षमालां गृहीत्वा सलीलं कण्ठाभरणतां अनयत्।

एतस्मिन् अन्तरे तरलिका नाम दासी महाश्वेतां अवोचत्। 'भर्तृदारिके, स्नाता देवी। प्रत्यासीदति गृहगमनकालः। तत् क्रियतां मज्जनविधिः' इति। तत् श्रुत्वा महाश्वेता कथं कथमपि तन्मुखाद् दृष्टिं आकृष्य स्नातुं उदचलत्।

उच्चलितायां महाश्वेतायां द्वितीयो मुनिदारकः कपिंजलो नाम तथाविधं पुण्डरीकस्य धैर्यस्खलितं आलोक्य किंचित्-प्रकटितप्रणयकोप इव अवादीत्।

"सखे, पुण्डरीक नैतद् अनुरूपं भवतः। क्षुद्रजनक्षुण्ण एष मार्गः। धैर्यधना हि साधवः। क सा सर्वविषयनिरुत्सुकता? क ते गुरूपदेशाः? सर्वथा निष्फलं ज्ञानम्! अहो विगतचेतनत्वम्! कथं करतलात् गलितां अपहृतामपि अक्षमालां न लक्षयसि? इदमपि तावद् अपह्रियमाणं अनया अनार्यया निवार्यतां हृदयम्" इति।

एवं अभिधीयमानश्च तेन किंचिद् उपजातलज्ज इव प्रत्यवादीत्। "सखे कपिञ्जल, किं मां अन्यथा संभावयसि? नाहमेवं अस्याः दुर्विनीतकन्यकाया मर्षयामि अक्षमालाग्रहणापराधं इमम्" इत्यभिधाय अलीककोपेन महाश्वेतासविधं आगत्य अवदत्। 'चपले, प्रदेशाद् अस्मात् अक्षमालां अदत्त्वा पदात्पदमपि न गन्तव्यम्' तच्च श्रुत्वा महाश्वेता आत्मकण्ठात् उन्मुच्य एकावलीं 'भगवन्। गृह्यतां इयं अक्षमाला' इति स्वमुखासक्तदृष्टेः शून्यहृदयस्य तस्य करे निहितवती। ततः सा यथाकथंचित् स्नात्वा सखीजनेन अम्बया च सह तमेव चिन्तयन्ती स्वभवनं अयासीत्।



कपिञ्जलः— सखे, अनया मालया सार्धं हृदयं ते अपहियते; तन्निवार्यताम् । [पृ. ४]

३ पुण्डरीकपत्रम्

अथ पुण्डरीकः, कर्पिंजलं कुसुमावचयाय अन्यतः गतं दृष्ट्वा अतिनिभृतपदः उपसृत्य महाश्वेतायाः पृष्ठतः गच्छन्तीं तरलिकां अप्राक्षीत्। 'बालिके, केयं कन्यका, कस्य वा अपत्यं, किमभिधाना, क्व वा गच्छति ?' इति। तया उक्तम्। 'एषा खलु गन्धर्वाधिपतेः हंसस्य दुहिता महाश्वेता नाम हेमकूटं अभिप्रस्थिता' इति। एवं कथिते च तया किमपि चिन्तयन्, मुहूर्तमिव तूष्णीं स्थित्वा तां आह। 'बालिके, मम वचनमेकं अभ्यर्थ्यमाना करोषि किम् ?' ततः सा सविनयमवादीत्। 'भगवन्, कस्माद् एवं अभिधत्से। का अहम्। महात्मानः त्वादृशाः पुण्यैर्विना अस्मद्विधेषु दृष्टिमपि न पातयन्ति, किं पुनः आज्ञाम् ? तद् विश्रब्धं आदिश्यतां कर्तव्यम्। अनुगृह्यतां अयं जनः' इति।

एवं उक्तः पुण्डरीकः निकटवर्तिनः तमालपादपस्य पल्लवमादाय, शिलातले तस्मात् रसं निष्पीडयामास। तेन च रसेन, उत्तरीयवल्कलैकदेशात् निपाट्य पट्टिकां, स्वहस्तनखाग्रेण तस्यां अभिलिखितवान् पत्रिकाम्। 'त्वया तस्यै कन्यकायै प्रच्छन्नं एकाकिन्यै देया इयं' इति अभिधाय च तरलिकायै तां अर्पितवान्।

ततः तरलिका भर्तृदारिकायाः पश्चात् चिरादिव गत्वा तां कन्यान्तःपुरे पट्टिकामदर्शयत्। सा तु तस्याः करतलादादाय तां वल्कलपट्टिकां, तस्यां अभिलिखितां आर्यामपश्यत्। 'दूरं मम मनः त्वया नीतम्' इति तदाशयः।

पत्रिकां वाचयित्वा, 'तरलिके, कथय कथं स त्वया दृष्टः, किं किं अभिहितासि तेन, कियन्तं कालं अवस्थितासि तत्र, कियत् अस्मान् अनुसरन् असौ आगतः' इति तां पुनःपुनः पर्यपृच्छत्। अनया एव च कथया तया सह तं दिवसं अत्यवाहयत्।

४ मित्रदौत्यम्

अथ अस्तं गते भगवति रवौ, तरलिका महाश्वेतां समागत्य अकथयत्। भर्तृदारिके, तयोः मुनिकुमारकयोः अन्यतरः द्वारि तिष्ठति कथयति च 'अक्षमालां उपयाचितुं आगतोऽस्मि' इति। ततस्तु महाश्वेता कञ्चुकिनं 'गच्छ, प्रवेश्यताम्' इत्यादिशत्।

अथ मुहूर्तादिव कपिंजलः तस्याः अन्तिकमुपागच्छत्। महाश्वेता च उत्थाय कृतप्रणामा सादरं स्वयमासनं उपाहरत्। उपविष्टे च तस्मिन् सा भूमौ एव तस्यान्तिके समुपाविशत्। ततः कपिंजलः अवादीत् 'राजपुत्रि, किं ब्रवीमि, न जाने किमिदं वल्कलानां सदृशम्, उताहो जटानां समुचितम्, किं तपसां अनुरूपमिदम्। अपूर्वेयं विडम्बना। केवलमवश्यं कथनीयमिदम्। अपर उपायो न दृश्यते। प्राणपरित्यागेनापि रक्षणीयाः सुहृदस्व इति कथयामि।

'अपयातायां भवत्यां अहं मुहूर्तं इव स्थित्वा एकाकी किं अयं मम सुहृत् पुण्डरीकः इदानीं आचरतीति संजातवितर्कः, विटपान्तरितविग्रहः, तं प्रदेशं व्यलोकयम्। यावत् तत्र तं नाद्राक्षं तावत् आसीत् मे मनसि एवम्, किं नु कुपितः परित्यज्य मां गतः। अन्वेषमाणश्च यथायथा नापश्यं तम्, तथातथा सुहृत्स्नेहकातरेण मनसा तद्तद् अशोभनं आशङ्कमानः इतस्ततः दत्तदृष्टिः, सुचिरं व्यचरम्। अथ एकस्मिन् लतागहने कृतावस्थानं प्रसुप्तमिव तमहं अद्राक्षम्।

'अपगतनिमेषेण चक्षुषा तं तदवस्थं चिरमुद्वीक्ष्य समुपजातविषादः अचिन्तयम्। अहो बत महच्चित्रम्! कथं एकपदे एव व्यर्थीभूतः एवंविधः ज्ञानराशिः। उपसृत्य च, "सखे पुण्डरीक, कथय किमिदम्," इति तं अपृच्छम्। ततः कथमपि चक्षुः



पुण्डरीकस्य प्राणरक्षार्थं कपिञ्जलः महाश्वेतां प्रार्थयते । [पृ. ७]

उन्मील्य निःश्वस्य च स शनैः अवदत्। "सखे कपिञ्जल, विदितवृत्तान्तोऽपि किं मां पृच्छसि ?" इति।

'अहं तदाकर्ण्य सुहृद् असन्मार्गप्रवृत्तः सर्वात्मना निवारणीयः इति मनसा अवधार्य अब्रवम्। सखे, यदेतदारब्धं भवता किमिदं गुरुभिः उपदिष्टम्? उत अपरः तपसां प्रकारः? का वा सुखाशा साधुजननिन्दितेषु एवंविधेषु विषयेषु भवतः? एवं वदतः एव मे वचनं आक्षिप्य करतलेन पाणौ मां अवलम्ब्य अवोचत्। "सखे किं बहुना उक्तेन ? सर्वथा सुस्थोऽसि। सुखं उपदिश्यते परस्य। यस्य च मनः विद्यते, यः यश्यति वा शृणोति वा, स खलु उपदेशं अर्हति। मम तु सर्वमेवेदं दूरापेतम्। तद् गत इदानीं उपदेशकालः। पच्यन्ते इव मे अङ्गानि। ज्वलतीव शरीरम्। अत्र यत् प्राप्तकालं तत्करोतु भवान्"। इत्यभिधाय तूष्णीमभवत्।

'एवमुक्तः अहं पुनरचिन्तयम्। इदानीं निरर्थकाः खलु उपदेशाः। प्राणाः तावदस्य येन केनचिदुपायेन शुभेनाशुभेन वा रक्षणीयाः। तेषां च त्वत्समागमं एकं अपहाय, नास्ति अपरः संरक्षणोपायः। अकृत्येनापि परिरक्षणीयाः सुहृदसव इति मन्यन्ते साधवः। तद् अकर्तव्यमपि अवश्यकर्तव्यतां आपतितम् इति चिन्तयित्वा तस्मात् प्रदेशात् आगतोऽहं भवत्याः सकाशम्। तदेवं अवस्थिते यदत्र अवसरप्राप्तं, आत्मनः वा समुचितं तत्र प्रभवति भवती'। इत्यभिधाय किं महाश्वेता वक्ष्यतीति तन्मुखासक्तदृष्टिः कपिंजलः तूष्णीमासीत्।

महाश्वेता तु तदाकर्ण्य अमृतमये ह्रदे इव निमग्ना तत्क्षणमचिन्तयत्। यदि च सत्यमेव तस्य ईदृशी दशा, ततः किमिव नोपकृतमनेन मदनेन। इत्थंभूते च किं मयापि प्रतिपत्तव्यम्। तस्य वा पुरः किमभिधातव्यम् इति। एवं विचारयन्त्यामेव तस्यां

प्रविश्य ससंभ्रमा प्रतीहारी अकथयत्। 'भर्तृदारिके, त्वं अस्वस्थशरीरा इति परिजनादुपलभ्य महादेवी प्राप्ता' इति। तच्च श्रुत्वा कपिंजलः महाजनसंमर्दभीरुः सत्वरमुत्थाय, 'भगवति, महानयं उपस्थितः कालातिपातः, तद्गच्छामि' इत्यभिधाय प्रययौ।

५ तपस्विनी महाश्वेता

ततः महाश्वेतायाः अम्बा तत्समीपं सुचिरं स्थित्वा स्वभवनमयासीत्। तया तु तत्रागत्य किं कृतं, किं अभिहितं इति शून्यहृदया महाश्वेता किमपि नालक्षयत्। गतायां च तस्यां, सा किंकर्तव्यतामूढा तरलिकामपृच्छत्। 'अयि तरलिके, कथं न पश्यसि दृढमाकुलं मे हृदयम्? उपदिशतु मे भवती यदत्र सांप्रतम्। अयमेवं त्वत्समक्षमेव अभिधाय गतः कपिञ्जलः। यदि तावत् इतरकन्यकेव विहाय लज्जां स्वयं उपगम्य ग्राहयामि पाणिं, एवं गुरुजनातिक्रमात् अधर्मो महान्! अथ धर्मानुरोधात् मृत्युं अङ्गीकरोमि, एवमपि मुनिजनवधजनितं महदेनो भवेत्' इति।

अथ तरलिका बद्धाञ्जलिः अवादीत्। 'भर्तृदारिके, किं लज्जया गुरुजनापेक्षया वा? प्रसीद। प्रेषय माम्। आनयामि ते हृदयदयितं जनम्। उत्तिष्ठ स्वयं वा तत्र गम्यताम्' इति।

एवं उक्ता महाश्वेता तरलिकया सह उदतिष्ठत्। अथ नातिदूरोद्गतेन चन्द्रमण्डलेन प्लाव्यमाने ज्योत्स्नया भुवनान्तराले रक्तांशुकेन कृताशिरोवगुण्ठना केनचित् आत्मीयेनापि परिजनेन अनुपलक्ष्यमाणा स्वप्रासादशिखरात् अवातरत्। अवतीर्य च, तरलिकया सह पुण्डरीकोद्देशं अभ्युपागमत्। उच्चालितायाश्च तस्याः दुर्नि-

मित्तानिवेदकं अस्पन्दत दक्षिणं लोचनम्। यस्मिन् प्रदेशे पुण्डरीक आसीत् तमेव अभ्युपागमत्। तत्र च सरसः पश्चिमे तटे पुरुषस्येव नातिव्यक्तं रुदितध्वनिं उपालक्षयत्। तेन सुतरां अवदीर्णहृदया 'तरलिके, किमिदम्' इति सभयं अभिदधाना पुण्डरीकाभिमुखं अतित्वरितं अगच्छत्। तत्र च 'हा हतोऽस्मि। हा वञ्चितोऽस्मि। आः पापे महाश्वेते, किमनेन ते अपकृतम्? हा भगवन् श्वेतकेतो, पुत्रवत्सल, न वेत्सि मुषितमात्मानम्। हा तपः, निराश्रयमासि! हा सरस्वति, विधवाऽसि! हा सत्य, अनाथमसि! सखे, प्रतिपालय मां; अहमपि भवन्तं अनुयास्यामि। न शक्नोमि भवता विना क्षणमपि अवस्थातुं एकाकी' इत्येतानि च अन्यानि च विलपन्तं कपिंजलं अश्रौषीत्। तं च श्रुत्वा सा वेपमानगात्रयष्टिः, पदे पदे प्रस्खलन्ती, तत्स्थानं गत्वा कपिञ्जलेन कण्ठे परिष्वक्तं तत्क्षणविगतजीवितं पुण्डरीकमद्राक्षीत्। तदा 'हा हा किमिदं उपनतम्' इति मुक्तार्तनादा 'हा हतास्मि मन्दभागिनी! धिङ्मां दुष्कृतकारिणीं यस्याःकृते तव इयं ईदृशी दशा वर्तते! किं मे गृहेण?। किं अम्बया?। किं वा तातेन?। कं उपयामि शरणम्। अयि दैव निर्घृण, दर्शय दयाम्। भगवत्यो वनदेवताः, प्रसीदत, प्रयच्छत अस्य प्राणान्' इत्येतानि च अन्यानि च व्याक्रोशन्ती उन्मत्तेव व्यलपत्। मुहुश्च तरलिकां कण्ठे गृहीत्वा प्रारोदीत्।

ततश्च मरणैकनिश्चया तत्तद् बहु विलप्य तरलिकामब्रवीत्। 'अयि, उत्तिष्ठ निष्ठुरहृदये, कियद् रोदिषि? काष्ठान्याहृत्य विरचय चितां, अनुसरामि जीवितेश्वरम्' इति।

अत्रान्तरे झटिति चन्द्रमण्डलनिर्गतः गगनादवतीर्य कुमुदधवलदेहः, महाप्रमाणः दिव्याकृतिः पुरुषः, पुण्डरीकं उपरतं उत्क्षिप्य, दुन्दुभिनादगम्भीरेण स्वरेण 'वत्से महाश्वेते, न

परित्याज्यास्त्वया प्राणाः, पुनरपि तव अनेन सह भविष्यति समागमः' इत्यभिधाय सहैव पुण्डरीकेण गगनतलमुदपतत्।

महाश्वेता तु तेन व्यतिकरेण सभया, सविस्मया, सकौतुका च उन्मुखी 'किमिदम्' इति कपिञ्जलमपृच्छत्। असौ तु अदत्त्वा एव उत्तरं उदतिष्ठत्। 'दुरात्मन्, क्व मे वयस्यं अपहृत्य गच्छसि' इत्यभिधाय उन्मुखः, संजातकोपः उत्पतन्तं तमेव अनुसरन् अन्तरिक्षं उदगात्। पश्यन्त्या एव तस्याः सर्वे एव ते तारागण-मध्यमविशन्।

तरलिका तु महाश्वेतायाः मरणशंकया सकरुणमवादीत्। "भर्तृदारिके, अमानुषाकृतिः एष पुरुषः। समाश्वासिता च अनेन गच्छता सानुकम्पं पित्रेव त्वम्। न अल्पं अपि कारणं अस्य मिथ्याभिधाने पश्यामि। अपि च तं अनुसरन् गत एव कपिञ्जलः। तस्माच्च 'कुतोऽयम्, को वाऽयम्, किमर्थं वा अनेन अपगतासुः अयं उत्क्षिप्य नीतः' इति सर्वमुपलभ्य जीवितं वा मरणं वा समाचरिष्यसि"। इत्यभिदधाना, पादयोः तस्या न्यपतत्। महाश्वेता च तदेव युक्तं मन्यमाना कपिञ्जलप्रत्यागमनकांक्षया न उत्सृष्टवती जीवितम्। तां च कालरात्रिप्रतिमां क्षपां तस्मिन्नेव सरस्तीरे क्षपितवती। **आशया हि किमिव न क्रियते ?**

अथ प्रत्युषसि उत्थाय सा तस्मिन् एव सरसि स्नात्वा कृतनिश्चया पुण्डरीकप्रीत्या तस्यैव वल्कलानि, तस्यैव च अक्षमालां गृहीत्वा गृहीतब्रह्मचर्या, देवं त्रैलोक्यनाथं अनाथशरणं शरणार्थिनी स्थाणुं आश्रितवती। अपरेद्युश्च कुतोऽपि समुपलब्धवृत्तान्तः तत्पिता सह अम्बया, तत्रागत्य बहुभिः उपदेशैः परिसान्त्वनैश्च गृहगमनाय तस्याः महान्तं यत्नमकरोत्। यदा च न सा अस्मात् व्यवसायात् कथंचिदपि शक्यते व्यावर्तयितुम् इति निश्चयमधिगतवान् तदा

सशोक एव अन्तर्दह्यमानहृदयः गृहान् अयासीत्। महाश्वेता च जपव्याजेन पुण्डरीकगुणगणान् इव गणयन्ती प्रतिदिनं अर्चयन्ती देवं त्र्यम्बकं तत्रैव तरलिकया सह सुचिरं न्यवसत्।

---

६ परस्परशपनम्

स दिव्याकृतिः महाप्रमाणः पुरुषः तारकागणं अतिक्रम्य चन्द्रलोकमगमत्। तत्र च महति पर्यंके पुण्डरीकशरीरं स्थापयित्वा आत्मानं अनुसरन्तं कपिञ्जलमवादीत्। "कपिञ्जल, जानीहि मां चन्द्रमसम्। अहं खलु जगदनुग्रहाय स्वव्यापारं अनुतिष्ठन्, अनेन ते प्रियवयस्येन निरपराधः संशप्तः 'दुरात्मन् इन्दुहतक, यथा अहं त्वया क्रूरैः संतापितः अप्राप्तहृदयवल्लभसमागमसुखः प्राणैर्वियोजितश्च तथा त्वमपि अस्मिन् भारते वर्षे जन्मनि जन्मनि एवमेव प्राप्तानुरागः अनिर्वृतः एव हृदयवेदनां अनुभूय जीवितं उत्सृक्ष्यसि' इति। अहं तु किमनेन निरपराधः शप्तोऽस्मि इति उत्पन्नकोपः त्वमपि मत्तुल्यदुःखसुखः एव भविष्यसि इति प्रतिशापं अस्मै प्रायच्छम्।

"अपगतामर्षश्च विमृशन् महाश्वेताव्यतिकरं पुण्डरीकस्य अधिगतवानस्मि। वत्सा तु महाश्वेता मन्मयूखसंभवे अप्सरसां कुले उत्पन्ना। तया च अयं भर्ता स्वयं वृतः। अनेन च मया सह मर्त्यलोके वारद्वयं अवश्यं उत्पत्तव्यम्। अन्यथा जन्मनि जन्मनि इत्येषा वीप्सैव न चरितार्था भवति। तद् यावदयं शापदोषो व्यपैति तावद् आत्मना विरहितस्य शरीरस्य मा विनाशो भूदिति मया इदं उत्क्षिप्य आनीतम्। वत्सा च महाश्वेता समाश्वासिता। अधुना त्वं गत्वा वृत्तान्तं इमं श्वेतकेतवे निवेदय। महाप्रभावोऽसौ कदा-

चिदत्र प्रतिक्रियामपि कांचित् करोति" इत्युक्त्वा तं व्यसर्जयत्।

कपिञ्जलस्तु शोकावेगान्धः, गीर्वाणवर्त्मना धावन् अतिक्रोधनं वैमानिकमेवं अलङ्घयत्। स तु कपिञ्जलमब्रवीत्। 'दुरात्मन्, मिथ्यातपोबलगर्वित, यदेवं अतिविस्तीर्णे गगनमार्गे त्वया अहं उद्दामप्रचारिणा तुरंगमेण इव उल्लङ्घितः तस्मात् तुरंगमः एव भूत्वा मर्त्यलोके अवतर' इति। कपिञ्जलस्तु कृताञ्जलिः अवदत्- 'भगवन्, वयस्यशोकान्धेन त्वं मया उल्लङ्घितः न अवज्ञया। तत् प्रसीद। उपसंहर शापम्' इति।

वैमानिकः पुनः अवादीत्- "यन्मयोक्तं तत् न अन्यथा भवितुमर्हति। अनया तु स्नेहलतया ते मम आर्द्रीकृतं हृदयम्। तद्, एतत् ते करोमि। तुरंगमत्वेऽपि ते प्रियवयस्येन सह अवियोगेन कालो यायात्। यस्य एव वाहनतां उपयास्यसि तस्यैव अवसाने स्नात्वा विगतशापो भविष्यसि" इति।

कपिञ्जलस्तु तद्वचनानन्तरमेव अधःस्थिते महोदधौ न्यपतत्। तस्माच्च तुरङ्गीभूय उदतिष्ठत्।

द्वितीयो भागः

७ विलासवतीतारापीडौ

अस्ति सकलत्रिभुवनललामभूता उज्जयिनी नाम नगरी, यस्यां भगवान् उत्सृष्टकैलासवासप्रीतिः, महाकालाभिधानः स्वयं प्रतिवसति। तस्यां च नलदशरथार्जुनप्रतिमः, भुजबलार्जितभूमण्डलः, मतिमान्, उत्साहसंपन्नः, अवतार इव धर्मस्य, राजा तारापीडोऽभवत्। तस्य च नीतिशास्त्रप्रयोगकुशलः, महत्स्वपि कार्य-



वैमानिकः-- दुरात्मन्, तुरङ्गमः एव भूत्वा मर्त्यलोके अवतर ।

[पृ. १२]

संकटेषु अविषण्णधीः, सकलवेदवेदाङ्गवित्, वसिष्ठ इव दशरथस्य, अमात्यः ब्राह्मणः शुकनासो नाम आसीत्। स राजा विजित्य सप्तद्वीपवलयां वसुंधरां, शुकनासे राज्यभारं आरोप्य, सुस्थिताः प्रजाः कृत्वा, प्रायः यौवनसुखान्यनुबभूव।

प्रजानुरागहेतोश्च अन्तरान्तरा दर्शनं ददौ। सिंहासनं च निमित्तेषु आरुरोह। शुकनासोऽपि महान्तं राज्यभारं अनायासेनैव प्रज्ञाबलेन बभार। एवं तस्य राज्ञः मन्त्रिनिवेशितराज्यभारस्य जीवलोकसुखानि अनुभवतः कालो जगाम। एकं तु तनयमुखदर्शनसुखं स न लेभे। यथायथा च यौवनमतिचक्राम तथातथा विफलमनोरथस्य अनपत्यताजन्मा महान् अवर्धत अस्य संतापः।

अथ तस्य अभूत् सकलान्तःपुरप्रधानभूता महिषी विलासवती नाम। एकदा च स तदावासं उपगतः तां अनलंकृतां रुदतीं ददर्श। कृताभ्युत्थानां च तां भीतभीतः इव भूपालः अवादीत्। 'देवि, किमर्थं रुद्यते त्वया? किमर्थं च न अलंकृतासि? प्रसीद, निवेदय देवि, दुःखनिमित्तम्' इति। एवं अभिधीयमानापि यदा न किंचित् प्रतिवचनं प्रतिपेदे तदा तस्याः ताम्बूलकरङ्कवाहिनी मकरिका नाम राजानं ऊचे।

"देव, अद्य तु चतुर्दशी इति भगवन्तं महाकालं अर्चितुं इतो गतया देव्या तत्र महाभारते वाच्यमाने श्रुतम् 'अपुत्राणां किल गतिः नास्ति, पुन्नाम्नो नरकात् त्रायते इति पुत्रः' इति। एतत् श्रुत्वा भवनं आगत्य न आहारं अभिनन्दति। न भूषणपरिग्रहं आचरति। न उत्तरं प्रतिपद्यते। केवलं रोदिति। एतत् आकर्ण्य देवः प्रमाणम्"। इत्यभिधाय विरराम।

विरतवचनायां तस्यां भूमिपालः तूष्णीं मुहूर्तमिव स्थित्वा निजगाद। "देवि, किमत्र क्रियतां दैवायत्ते वस्तुनि? न वयं

अनुग्राह्याः प्रायो देवतानाम्। अन्यस्मिन् जन्मनि न कृतं अवदातं कर्म। जन्मान्तरविहितं हि कर्म फलमुपनयति पुरुषस्य इह जन्मनि। न हि शक्यं दैवं अन्यथाकर्तुं अभियुक्तेनापि। यावन्मानुष्यके शक्यं उपपादयितुं तावत् सर्वं उपपाद्यताम्। अधिकां कुरु, देवि, गुरुषु भक्तिम्। द्विगुणां उपपादय देवतासु पूजाम्। श्रूयते हि पुरा दशरथो राजा परिणतवयाः ऋष्यशृंगस्य प्रसादात् अवाप चतुरः पुत्रान्। अमोघफला हि महामुनिसेवा भवति।

"अहमपि खलु, देवि, अफलमिव पश्यामि राज्यम्। कदा मे तनयजन्ममहोत्सवानन्दनिर्भरो हरिष्यति पूर्णपात्रम् परिजनः? कदा सुतसनाथोत्सङ्गा मां आनंदयिष्यति देवी? मामपि दहत्येव अनपत्यतासमुद्भवः शोकः। अप्रतिविधेये तु विधातरि किं करोमि? तद् मुच्यतां अयं शोकानुबन्धः। आधीयतां धैर्ये धर्मे च धीः। धर्मपरायणानां हि समीपसंचारिण्यः कल्याणसंपदो भवन्ति"। इत्येवमभिधाय धर्मोपदेशगर्भाभिः वाग्भिः आश्वास्य च तां, नरेन्द्रो निर्जगाम।

---

८ चन्द्रापीडावतारः

ततः प्रभृति विलासवती सुतरां देवताराधनेषु, ब्राह्मणपूजासु, गुरुजनसपर्यासु च आदरवती बभूव। अश्वत्थप्रभृतीन् महावनस्पतीन् कृतप्रदक्षिणा ववन्दे। अनवरतवाच्यमानाः पुण्यकथाः शुश्राव। यद्यद् च कुतश्चित् शुश्राव तत्तद् अर्भकतृष्णया सर्वं चकार।

एवं च गच्छति काले कदाचिद् राजा क्षीणभूयिष्ठायां रजन्यां, स्वप्ने विलासवत्याः आनने शशिनं प्रविशन्तं अद्राक्षीत्। प्रबुद्धश्च

उत्थाय तस्मिन्नेव क्षणे शुकनासमाहूय तं स्वप्नमकथयत्। समुपजातहर्षः स तं प्रत्युवाच। "संपन्नाः सुचिरात् अस्माकं मनोरथाः। कतिपयैः एव अहोभिः असंशयं अनुभविष्यति स्वामी सुतमुखकमलावलोकनसुखम्। अद्य खलु मयापि स्वप्ने निशि प्रशान्तमूर्तिना दिव्याकृतिना द्विजेन पुण्डरीकं उत्संगे देव्याः मनोरमायाः निहितं दृष्टम्। **आवेदयन्ति हि प्रत्यासन्नं आनन्दं अग्रजातानि शुभानि निमित्तानि।** अवितथफला हि प्रायो निशावसानसमये दृष्टा भवन्ति स्वप्नाः। सर्वथा नचिरेणैव भुवनानन्दहेतुं आत्मजं जनयिष्यति देवी" इति।

ततः पूर्णे प्रसवसमये, पुण्ये अहनि, प्रशस्तायां वेलायां, विलासवती सुतमसूत। तस्मिन् जाते, हर्षनिर्भराः प्रजाः जाताः। प्रतिक्षणं अवर्धत, चन्द्रोदयेन इव जलधिः, कलकलमुखरः राजसूनोः जन्ममहोत्सवः। पार्थिवस्तु स्निग्धेन चक्षुषा पिबन्निव सस्पृहं ईक्षमाणः तनयाननं मुमुदे कृतकृत्यं च आत्मानं मेने। समृद्धमनोरथस्तु शुकनासः भूमिपालमवादीत्। "देव, पश्य पश्य, अस्य चक्रवर्तिचिह्नानि। तथाहि अस्य पुण्डरीकधवलं धवलयति इव वासभवनं लोचनयुगलम्। परिमलमनोहरं सहजं आननामोदं आजिघ्रतीव नासिका। भगवतः विष्णोः इव शङ्खचक्रलाञ्छितौ करौ। एष च दुन्दुभेः इव अतिगम्भीरः स्वरयोगोऽस्य रुदतः श्रूयते"।

इत्येवं कथयति तस्मिन्, मङ्गलकनामा प्रहृष्टवदनः पुरुषः, पादयोः प्रणम्य राजानं व्यजिज्ञपत्। 'देव, दिष्ट्या वर्धसे। प्रतिहताः ते शत्रवः। त्वत्प्रसादात् अत्रभवतः शुकनासस्यापि मनोरमायां तनयो जातः। श्रुत्वा देवः प्रमाणम्' इति। अथ नृपतिः अमृतवृष्टिप्रतिमं आकर्ण्य तद्वचनं प्रत्यवदत्। 'अहो कल्याणपरम्परा। सत्योऽयं जनप्रवादो यद् **विपत् विपदं संपत् संपदं**

अनुबध्नाति' इति। इत्यभिधाय तस्मै पुरुषाय अपरिमितं पारितोषिकं आदिदेश। उत्थाय च शुकनासभवनं गत्वा द्विगुणतरं उत्सवमकारयत्।

अथ दशमे अह्नि, पुण्ये मुहूर्ते, गाः सुवर्णं च कोटिशो ब्राह्मणसात् कृत्वा, मातुः अस्य मया चन्द्रः स्वप्ने मुखकमलं आविशन् दृष्टः इति स्वप्नानुरूपमेव राजा स्वसूनोः चन्द्रापीड इति नाम चकार। अपरेद्युः शुकनासोऽपि कृत्वा ब्राह्मणोचिताः सर्वाः क्रियाः राजानुमतं, आत्मजस्य विप्रजनोचितं वैशंपायन इति नाम चक्रे।

---

९ चन्द्रापीडस्य विद्यागृहवास

क्रमेण कृतचूडाकरणादिक्रियाकलापस्य शैशवमतिचक्राम चन्द्रापीडस्य। तारापीडः तस्य कृते बहिर्नगरात् अनुशिप्रं महता परिखावलयेन पारवेष्टितं, कल्पितव्यायामशालं विद्यामंदिरमकारयत्। सर्वविद्याचार्याणां च संग्रहे यत्नमतिमहान्तं अन्वतिष्ठत्। अखिलविद्योपादानार्थं आचार्येभ्यः चन्द्रापीडं शोभने दिवसे वैशंपायनद्वितीयमर्पयांबभूव। प्रतिदिनं च उत्थाय उत्थाय सह विलासवत्या तत्रैव गत्वा एनमालोकयामास राजा।

चन्द्रापीडोऽपि अनन्यहृदयतया अचिरेणैव कालेन पात्रवशात् उपजातोत्साहैः आचार्यैः उपदिश्यमानः सर्वविद्या जग्राह। मणिदर्पणे इव अतिनिर्मले तस्मिन् संचक्राम सकलः कलाकलापः। धर्मशास्त्रे, राजनीतिषु, व्यायामविद्यासु च, कृपाणगदापरशुप्रभृतिषु सर्वेषु आयुधविशेषेषु, वीणावेणुप्रभृतिषु वाद्येषु, हस्तीशिक्षायां,

तुरगषयोज्ञाने, रत्नपरीक्षासु, नाटकेषु, आख्यायिकासु, काव्येषु, सर्वदेशभाषासु, अन्येष्वपि च कलाविशेषेषु परं कौशलमवाप।

सहजा चास्य श्रमं अजस्रं अभ्यस्यतः वृकोदरस्य इव शैशवे एव आविर्बभूव सर्वलोकविस्मयजननी महाप्राणता। यदृच्छया क्रीडता अपि अनेन करतलावलम्बितकर्णाः गजकलभाः चलितुमपि न शेकुः। एकेनैव कृपाणप्रहारेण तालतरून् मृणालदण्डानिव लुलाव। एवं तस्य सर्वविद्यापरिचयमाचरतः चन्द्रापीडस्य यौवनारम्भः प्रादुर्भवन्, रमणीयस्यापि द्विगुणां रमणीयतां पुपोष। ऋते च महाप्राणतायाः सर्वाभिः अन्याभिः कलाभिः अनुचकार तं वैशंपायनः। चन्द्रापीडस्य तु सहपांशुक्रीडिततया सहसंवृद्धतया च सर्वविश्रम्भस्थानं द्वितीयमिव हृदयं वैशंपायनः परं मित्रमासीत्। निमेषमपि तेन विना स्थातुं एकाकी न शशाक। वैशम्पायनोऽपि न क्षणमपि तं विरहयांचकार।

---

१० चन्द्रापीडस्य प्रत्यावर्तनम्

एवं च क्रमेण परिसमाप्तसकलकलाविज्ञानं अनुमोदितं आचार्यैः चन्द्रापीडं आनेतुं, अतिशस्ते अहनि राजा बलाधिकृतं बलाहकनामानमाहूय प्राहिणोत्। स गत्वा विद्यागृहं, शिरसा प्रणम्य राजसमीप इव सविनयं राजपुत्रानुमतो न्यषीदत्। स्थित्वा च मुहूर्तमात्रं बलाहकः चन्द्रापीडं व्यजिज्ञपत्।

कुमार, महाराजः समाज्ञापयति — "पूर्णा नो मनोरथाः। अधीतानि त्वया शास्त्राणि। शिक्षिताः सकलाः कलाः। अनुमतोऽसि विनिर्गमाय विद्यागृहात् सर्वाचार्यैः। उपगृहीतशिक्षं पश्यतु त्वां

जनः। व्रजन्तु सफलतां अतिचिरदर्शनोत्कण्ठितानि लोकलोचनानि। अयं अत्रभवतो दशमो वत्सरः विद्यागृहमधिवसतः। प्रविष्टोऽसि षष्ठमनुभवन् वर्षम्। तद् अद्यप्रभृति निर्गत्य दर्शनोत्सुकाभ्यो दत्त्वा दर्शनं मातृभ्यः, अभिवाद्य च गुरून्, यथासुखमनुभव राज्यसुखानि। संमानय राजलोकम्। पूजय द्विजातीन्। परिपालय प्रजाः। अयं च ते गरुडसमजवः इन्द्रायुधनामा तुरंगमः प्रेषितो महाराजेन द्वारि तिष्ठति। एष खलु देवस्य पारसीकाधिपतिना त्रिभुवनाश्चर्यम् इति कृत्वा 'जलधिजलादुत्थितं इदं अश्वरत्नमासादितम् मया, महाराजारोहणयोग्यम्' इति संदिश्य प्रहितः। यानि उच्चैःश्रवसः श्रूयन्ते लक्षणानि तैः अयं उपेतः। नैवंविधो भूतो भावी वा तुरङ्गमः। तद् अयं अनुगृह्यतामधिरोहणेन। इदं च राजपुत्राणां सहस्रं परिचारार्थं अनुप्रेषितं द्वारि प्रतिपालयति"।

इत्यभिधाय विरतवचसि बलाहके, चन्द्रापीडः पितुराज्ञां शिरसि कृत्वा 'प्रवेश्यतां इन्द्रायुधः' इति निर्जिगमिषुः आदिदेश। अथ वचनानन्तरमेव प्रवेशितं इन्द्रायुधमद्राक्षीत्। दृष्ट्वा च तमदृष्टपूर्वं चन्द्रापीडस्य पस्पर्श विस्मयो हृदयम्। आसीच्च अस्य मनसि। 'अतितेजस्वितया सदैवता इव इयं अस्य आकृतिः। यत् सत्यं आरोहणे शंकामिव मे जनयति। असंशयं अनेनापि महात्मना केनापि शापभाजा भवितव्यम्'।

इति विचिन्तयन् एव आरुरुक्षुः आसनादुदतिष्ठत्। मनसा च तं तुरगमं 'महात्मन्, योऽसि, सोऽसि। नमोऽस्तु ते। सर्वथा मर्षणीयः अयमारोहणातिक्रमः अस्माकम्' इति आमंत्रयांबभूव। विदिताभिप्राय इव स इन्द्रायुधः मुहुर्मुहुः क्षितितलं ताडयता दक्षिणखुरेण तं आरोहणाय आह्वयन् इव, अतिमनोहरं हेषारवमकरोत्। अथ अनेन मधुरहेषितेन दत्तारोहणाभ्यनुज्ञ इव इन्द्रायुध-

मारुरोह चन्द्रापीडः। समारुह्य तं निर्गत्य अप्रमेयं अश्वसैन्यमपश्यत्। राजपुत्राश्च ते दूरावनतैः शिरोभिः तं प्रणेमुः। चन्द्रापीडस्तु तान् सर्वान् मानयित्वा, तुरंगममधिरूढेन अनुगम्यमानः वैशंपायनेन, बन्दिजनेन स्तूयमानश्च नगराभिमुखः प्रतस्थे।

क्रमेण च तं नगरमार्गमनुप्राप्तमवलोक्य सर्व एव परित्यक्तसकलव्यापारः जनः समजनि। 'अहो, वयं पुण्यभाजः' इति वदन् तं नगरलोकः प्रणनाम। 'समाप्तसकलविद्यः अयमागच्छति चन्द्रापीडः' इति समाकर्ण्य अवलोकनकुतूहलिन्यः हर्म्यतलानि ललनाः समारुरुहुः। मुहूर्तादिव नारीमया इव प्रासादा बभूवुः। चन्द्रापीडः च क्रमेण राजद्वारमासाद्य तुरंगमादवततार।

अवतीर्य च करतलेन करे वैशंपायनमवलम्ब्य, गन्धमादननाम्ना गन्धहस्तिना सनाथीकृतैकदेशं दुष्प्रवेशं राजकुलं विवेश। दृष्ट्वा च तं शिरसा कृतप्रणामं 'एहि एहि' इति अभिदधानः, दूरादेव प्रसारितभुजयुगलः, आनन्दजलापूर्यमाणलोचनः पिता समालिलिङ्ग। आलिङ्गितोन्मुक्तश्च पितुश्चरणपीठसमीपे चन्द्रापीडः क्षितितले एव निषसाद। अनन्तरं राज्ञा सुतनिर्विशेषं उपगूढः वैशंपायनो न्यषीदत्। मुहूर्तमिव स्थित्वा 'गच्छ वत्स, मातरमभिवाद्य, यथाक्रमं सर्वाः जननीः दर्शनेन आनन्दय' इति विसर्जितः पित्रा सविनयं उत्थाय अन्तःपुरमाययौ। तत्र च पुण्याः कथाः कथयन्तीभिः प्रव्रजिताभिः विनोद्यमानां मातरं समुपसृत्य प्रणनाम। सा तु तं ससंभ्रमं उत्थाय कृतावतरणमङ्गला मूर्धनि उपाघ्राय बलादनिच्छन्तमपि चन्द्रापीडं उत्सङ्गमारोपितवती। तं च ललाटदेशे वक्षसि च मुहुर्मुहुः परामृशन्ती अवादीत्।

"वत्स, कठिनहृदयस्ते पिता येन इयं आकृतिः ईदृशी

त्रिभुवनलालनीया क्लेशमतिमहान्तं इयन्तं कालं लम्भिता। अहो! बालस्यापि सतः कठोरस्य इव ते महद् धैर्यम्। अहो! विगत-शिशुजनक्रीडाकौतुकं अर्भकस्यापि ते हृदयम्। अहो! गुरुजनस्य उपरि भक्तिः असाधारणा। सर्वथा यथा पितुः प्रसादात् समरताभिः उपेतः विद्याभिः आलोकितोऽसि, एवं अचिरेणैव कालेन अनुरूपाभिः वधूभिः उपेतमालोकयिष्यामि" इति। एवमभिहितः लज्जास्मितावनतः निर्गत्य च शुकनासं द्रष्टुमयासीत्। अथ शुकनासभवनं प्रविश्य, पितरमिव शुकनासं ववन्दे। शुकनासः समुद्वृतप्रीतिपुलकः तमब्रवीत्।

"तात चन्द्रापीड, अद्य समृद्धाः सर्वाः गुरुजनाशिषः। अद्य प्रसन्नाः कुलदेवताः। क इदं वयः। क इयं अमानुषी शक्तिः! क च इदं अशेषविद्याग्रहणसामर्थ्यम्! अहो! धन्याः प्रजाः, यासां भरतभगीरथप्रतिमो भवान् उत्पन्नः पालयिता"। इत्यभिधाय च स्वयं आभरणवस्त्रादिभिः अभ्यर्च्य विसर्जयांचकार। विसर्जितश्च उत्थाय अन्तःपुरं प्रविश्य दृष्ट्वा वैशंपायनमातरं मनोरमाभिधानां, कुमारः पित्रा पूर्वकल्पितं भवनं जगाम। गत्वा च शयनीयगृहे एव इन्द्रायुधस्य अवस्थानमकल्पयत्। एवंप्रायेण च उदन्तेन अस्य तद् अहः परिणतिमुपययौ।

११ चन्द्रापीडस्य मृगयाविनोदः

अपरेद्युः प्रभातायां निशीथिन्यां चन्द्रापीडः समुत्थाय, समभ्यनुज्ञातः पित्रा, अभिनवमृगयाकौतुकाकृष्यमाणहृदयः, भगवति अनुदिते एव सहस्ररश्मौ, आरुह्य इन्द्रायुधं, बहुगजतुरगपदातिपरिवृतः, वनं ययौ। तत्र च श्वपोषकैः अनवरतकृतकोलाहलैः, प्रधावद्भिः द्विगुणीक्रियमाणगमनोत्साहः, वनवराहान्, केसरिणः, अनेकविधकुरङ्गांश्च सहस्रशो जघान। अन्यांश्च जीवत एव जग्राह।

समारूढे च मध्यं अह्नः सवितरि, समुद्वत्स्वेदतया नवपल्लवेन निवार्यमाणातपः, सह राजपुत्रैः 'एवं मृगपतिः, एवं वराहः, एवं हरिणः,' इति तमेव मृगयावृत्तान्तं उच्चारयन् स्वभवनमाजगाम।

अवतीर्य च तुरङ्गमात्, अपनीय च अशेषं तुरंगाधिरोहणोचितं वेशपरिग्रहं मुहूर्तं विशश्राम। विश्रम्य च मणिरजतकनककलशसनाथां, अन्तर्विन्यस्तकाञ्चनपीठां स्नानभूमिमगात्। निर्वर्तिताभिषेकव्यापारः, कृतदेवतार्चनः मात्रा विलासवत्या प्रेषितानि विविधानि आभरणानि वासांसि च पर्यधत्त। तदनु आहारमण्डपं अगच्छत्। तत्र च समीपोपविष्टेन 'इदं अस्मै दीयताम्' 'इदं अस्मै दीयताम्' इति तद्गुणोपवर्णनपरेण वैशंपायनेन राजपुत्रलोकेन च सह आहारविधिमकरोत्। गृहीतताम्बूलश्च मुहूर्तमिव स्थित्वा इन्द्रायुधसमीपमगमत्। तत्र च सत्यपि पार्श्वपरिवर्तिनि परिजने, स्वयमेव इन्द्रायुधस्य पुरो यवसं आकीर्य, निर्गत्य राजभवनमयासीत्। तेनैव क्रमेण अवलोक्य राजानं आगत्य स्वभवनं निशां अनैषीत्।

---

१२ पत्रलेखा

अपरेद्युश्च प्रभातसमये एव चन्द्रापीडः क्वणितमणिनूपुराकुलचरणयुगलया कन्यकया अनुगम्यमानं कञ्चुकिनं आयान्तमपश्यत्। समुपसृत्य क्षितितलनिहितदक्षिणकरः कञ्चुकी विज्ञापयामास। "कुमार, महादेवी विलासवती समाज्ञापयति 'इयं खलु कन्यका महाराजेन पूर्वं कुलूतराजधानीमवजित्य, कुलूतेश्वरदुहिता पत्रलेखाभिधाना, बालिका सती बन्दीजनेन सह आनीय अन्तःपुरपरिचारिकामध्यं उपनीता। सा मया विगतनाथा राजदुहिता इति दुहितृनिर्विशेषं इयन्तं कालं उपलालिता संवर्धिता च। तद् इयं इदानीं उचिता भवतः ताम्बूलकरङ्कवाहिनी इति कृत्वा मया प्रेषिता। न च अस्यां आयुष्मता परिजनसामान्यदृष्टिना भवितव्यम्। बालेव लालनीया। सुहृदिव सर्वविश्रम्भेषु अभ्यन्तरीकरणीया। स्वसुतायामिव हृदयमस्यामस्ति मे। नियतं इयं स्वयमेव अतिविनीततया कतिपयैः एव दिवसैः कुमारं आराधयिष्यति। सर्वथा तथा कल्याणिना भवितव्यं, यथा इयं अतिचिरं उचिता परिचारिका ते भवति।"

इत्यभिधाय विरतवचसं कञ्चुकिनं, कृतप्रणामां पत्रलेखां सुचिरमालोक्य चन्द्रापीडः 'यथा आज्ञापयति अम्बा' इति उक्त्वा प्रेषयामास। पत्रलेखा तु ततःप्रभृति न दिवा न रात्रौ, न सुप्तस्य न आसीनस्य, न उत्थितस्य न भ्रमतः, छायेव राजसूनोः पार्श्वं मुमोच। चन्द्रापीडस्यापि तस्यां दर्शनादारभ्य महती प्रीतिरासीत्। अभ्यधिकं च प्रतिदिनं अस्याः प्रसादं अकरोत्। आत्महृदयाद अव्यतिरिक्तामिव च एनां सर्वविश्रम्भेषु अमन्यत।

१३ शुकनासोपदेशः

एवं समतिक्रामत्सु दिवसेषु तारापीडो चन्द्रापीडस्य यौवराज्याभिषेके मतिं चकार। समुपस्थितयौवराज्याभिषेकं चंद्रापीडं कदाचिद्दर्शनार्थमागतं, आरूढविनयमपि विनीततरमिच्छन् शुकनासः प्रोवाच। "तात चंद्रापीड, विदितवेदितव्यस्य, अधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति। केवलं तु निसर्गतः एव अतिगहनं तमो यौवनप्रभवम्, दारुणो लक्ष्मीमदः, अत्यन्ततीव्रो दर्पज्वरोष्मा इत्यतो विस्तरेणाभिधीयसे।

"गर्भेश्वरत्वं, अभिनवयौवनत्वं, अप्रतिमरूपत्वं, अमानुषशक्तित्वं चेति महती इयं खलु अनर्थपरम्परा। सर्वाविनयानां एकैकमपि एषां आयतनं किमुत समवायः? यौवनारम्भे च प्रायः शास्त्रजलप्रक्षाल्ननिर्मलापि कालुष्यमुपयाति बुद्धिः। भवादृशा एव भवन्ति भाजनानि उपदेशानाम्। अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेनोपदेशाः। विरला हि राज्ञामुपदेष्टारः। प्रतिशब्दक इव राजवचनमनुगच्छति जनो भयात्। उद्दामदर्पाश्च ते उपदिश्यमाना न शृण्वन्ति। शृण्वन्तोऽपि च अवधीरयन्तः खेदयन्ति हितोपदेशदायिनो गुरून्।

"आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव भवान् प्रथमम्। इयं हि पारिजातपल्लवेभ्यो रागम्, उच्चैःश्रवसः चञ्चलतां, कालकूटात् मोहनशक्तिं, मदिरायाः मदं, इत्येतानि सहवासपरिचयवशाद्विरहविनोदचिह्नानि गृहीत्वा इव क्षीरसागराद् उद्गता। लब्धापि खलु दुःखेन परिपाल्यते। न परिचयं रक्षति। नाभिजनमीक्षते। न रूपमालोकयते। न कुलक्रमनुवर्तते। न शीलं पश्यति। न वैदग्ध्यं गणयति। न श्रुतमाकर्णयति। न धर्ममनुरुध्यते। न सत्यमनुबुध्यते। जनं गुणवन्तमपवित्रमिव न

स्पृशति। उदारसत्त्वममङ्गलमिव न बहु मन्यते। शूरं कण्टकमिव परिहरति। तथा हि—संततं ऊष्माणं उपजनयन्त्यपि जाड्यमुपजनयति। उन्नतिमादधानापि नीचस्वभावतामाविष्करोति। अमृतसहोदरापि कटुविपाकेयम्। न हि तं पश्यामि योऽनया न विप्रलब्धः।

"एवं विधयाऽनया कथमपि दैववशेन परिगृहीता विक्लवा भवन्ति राजानः, सर्वाविनयाधिष्ठानतां च गच्छन्ति। तथा हि अभिषेकसमये एव एतेषां मङ्गलकलशजलैरिव प्रक्षाल्यन्ते दाक्षिण्यं क्षान्तिः सत्यवादिता च। मिथ्याभाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः, न पूजयन्ति द्विजान्, न मानयन्ति मान्यान्, न अर्चयन्ति अर्चनीयान्, न अभ्युत्तिष्ठन्ति गुरून्।

कुमार, एवंप्राये राज्यतन्त्रेऽस्मिन् महामोहकारिणि च यौवने तथा प्रयतेथाः, यथा नोपहस्यसे जनैः, न निंद्यसे साधुभिः, न धिक्क्रियसे गुरुभिः। कामं भवान् प्रकृत्यैव धीरः, पित्रा च महता प्रयत्नेन समारोपितसंस्कारः। तथापि भवद्गुणसंतोषो मामेवं मुखरीकृतवान्। सर्वथा कल्याणैः पित्रा क्रियमाणमनुभवतु भवान्नवयौवराज्याभिषेकमङ्गलम्। कुलक्रमागतामुद्वह पूर्वपुरुषैः ऊढां धुरम्। अवनमय द्विषतां शिरांसि। उन्नमय बन्धुवर्गम्। अभिषेकानन्तरं च प्रारब्धदिग्विजयः परिभ्रमन् विजितामपि तव पित्रा सप्तद्वीपभूषणां पुनर्विजयस्व वसुंधराम्। अयं च ते कालः प्रतापमारोपयितुम्।"

उपशान्तवचसि शुकनासे चंद्रापीडस्तामिरुपदेशवाग्भिः प्रक्षालित इव, अभिषिक्त इव, पवित्रीकृत इव, प्रीतहृदयो मुहूर्तमिव स्थित्वा स्वभवनमाजगाम।

---

१४ यौवराज्याभिषेकः

ततः कतिपयदिवसापगमे च तारापीडः स्वयमुत्क्षिप्तमंगलकलशः सह शुकनासेन पुण्येऽहनि, अनेकनरपतिसहस्रपरिवृतः, सर्वेभ्यस्तीर्थेभ्यः, सर्वाभ्यो नदीभ्यः सर्वेभ्यश्च सागरेभ्यः समाहृतेनं, सर्वौषधिभिः सर्वफलै सर्वरत्नैश्च परिगृहीतेन, आनन्दबाष्पजलमिश्रेण मंत्रपूतेन वारिणा सुतमभिषिषच। अभिषेकसलिलार्द्रदेहं च तं लतेव पादपान्तरं निजपादपमुञ्चत्यपि तारापीडं, तत्क्षणमेव संचक्राम राज्यलक्ष्मीः।

अनन्तरं अखिलान्तःपुरपरिवृतया च प्रेमार्द्रहृदयया विलासवत्या स्वयं आ पादतलात् आमोदिना चंद्रातपधवलेन चंदनेनानुलिप्तमूर्तिः, अभिनवविकसितकुसुमकृतशेखरः, इन्दुधवलं दुकूलयुगलं वसानः, तत्कालप्रतिपन्नवेत्रदण्डेन पित्रा स्वयं पुरः प्रारब्धसमुत्सारणः, सभामण्डपमुपगम्य काञ्चनमयं, शशीव मेरुशृङ्गं, चन्द्रापीडः सिंहासनमारुरोह।

---

१५ दिग्विजयः

आरूढस्य च अस्य कृतयथोचितसकलराजलोकसंमानस्य मुहूर्तं स्थित्वा दिग्विजयप्रयाणशंसी प्रस्थानदुन्दुभिर्दध्वान। येन ध्वनता बधिरीकृतानीव रवेण भुवनान्तराणि। ततो दुन्दुभिरवमाकर्ण्य जय जयेति च सर्वतः समुद्घुष्यमाणजयशब्दः सिंहासनात् सह द्विषतां श्रिया संचचाल चन्द्रापीडः। समन्तात् ससंभ्रमोत्थितैश्चानुगम्यमानो नरपतिसहस्रैरास्थानमण्डपान्निरगात्।

निर्गत्य च पूर्वारूढया पत्रलेखया समध्यासितां करेणुकामधिरुह्य, आतपत्रेण निवार्यमाणातपः निर्गन्तुमारेभे। विनिर्गतश्च अवनिभुजां चक्रवालैः प्रणम्यमानः, गन्धमादनेन अनुगम्यमानः, इन्द्रायुधेन सनाथीकृतपुरोभागः, शनैः शनैः प्रथममेव शातक्रतवीं आशां अभिप्रतस्थे।

अथ उच्चलितस्य च अस्य स्वभवनात् उपपादितप्रस्थानमङ्गलः, धवलदुकूलवासाः, महता बलसमूहेन नरेन्द्रवृन्दैश्चानुगम्यमानः, धृतधवलातपत्रः द्वितीय इव युवराजः वैशंपायनः समीपमाजगाम। आगत्य च, रजनिकर इव रवेः,आसन्नवर्ती बभूव। अनन्तरं इतश्चेतश्च 'निर्गतो युवराजः' इति समाकर्ण्य प्रधावतां बलानां भरेण तत्क्षणमाचकम्पे मेदिनी। क्षणेन च तुरगमयमिव महीतलम्, कुञ्जरमयमिव दिक्चक्रवालम्, आतपत्रमण्डलमिव अन्तरिक्षं, जयशब्दमयमिव त्रिभुवनमभवत्।

अथ आलोक्य तद् अपरिमाणं बलं उपजातविस्मयः सर्वतो दत्तदृष्टिः वैशंपायनश्चन्द्रापीडमाबभाषे। "युवराज, किं न जितं देवेन महाराजाधिराजेन तारापीडेन यज्जेष्यसि? का दिशो न वशीकृता, या वशीकरिष्यसि? कानि दुर्गाणि न प्रसाधितानि, यानि प्रसाधयिष्यसि? कानि रत्नानि नोपार्जितानि, यानि उपार्जयिष्यसि? के वा न प्रणता राजानः? कैर्न घृष्टाः पादपीठे चूडामणयः? कैर्नोच्चारिता जयशब्दाः? तथा हि—पश्य पश्य यस्यां यस्यां दिशि विक्षिप्यते चक्षुः, तस्यां तस्यां रसातलमिव उद्गिरति, वसुधेव सूते, गगनमिव वर्षति, दिवस इव सृजति बलानि। अपरिमितबलभराक्रान्ता मन्ये स्मरति महाभारतसमरसंक्षोभस्य अद्य क्षितिः।"

एवं वदत एव तस्य, युवराजः समुच्छ्रितानेकतोरणां धवलपटमण्डपशतशोभिनीं आवासभूमिमवाप। तस्यां चावतीर्य राजवत

सर्वाः क्रियाश्चकार । सर्वैश्च तैः समेत्य नरपतिभिरमात्यैश्च विविधामिः कथाभिर्विनोद्यमानः तं दिवसं अशेषं अभिनवपितृवियोगजन्मना शोकावेगेन आयास्यमानहृदयः, दुःखेन अत्यवाहयत्। अतिवाहितदिवसश्च यामिनीमपि वैशंपायनेन सह कुर्वन्नालापं नात्युपजातनिद्रः प्रायेण जाग्रदेव निन्ये । प्रत्यूषे च उत्थाय सेनासमुदायेन जर्जरयन् वसुंधरां, आकम्पयन् गिरीन्, रिक्तीकुर्वन् सरांसि, चूर्णयन् काननानि, समीकुर्वन् विषमाणि प्रातिष्ठत ।

शनैः शनैश्च स्वेच्छया परिभ्रमन्, नमयन् उन्नतान्, उन्नमयन् अवनतान्, आश्वासयन् भीतान्, रक्षन् शरणागतान्, उत्सादयन् कण्टकान्, अभिषिञ्चन् स्थानस्थानेषु राजपुत्रान्, समर्जयन् रत्नानि, प्रतीच्छन् उपायनानि, गृह्णन् करान्, आदिशन् देशव्यवस्थां, स्थापयन् स्वचिह्नानि, लेखयन् शासनानि, पूजयन् अग्रजन्मनः, प्रणमन् मुनीन्, पालयन्नाश्रमान्, जनानुरागं प्रकाशयन्, विस्तारयन् गुणान्, प्रख्यापयन् सच्चरित्रं पृथिवीं विचचार ।

प्रथमं प्राचीं, ततो दक्षिणां, ततः उदीचीं जिग्ये । वर्षत्रयेण च आत्मीकृताशेषद्वीपान्तरं सकलमेव बभ्राम महीमण्डलम्। ततः क्रमेण निर्जितसकलभुवनतलः, प्रदक्षिणीकृत्य वसुधां, परिभ्रमन्, कदाचित् कैलाससमीपचारिणां किरातानां सुवर्णपुरं नाम निवासस्थानं जित्वा जग्राह। तत्र च निखिलधरणितलपर्यटनखिन्नस्य निजबलस्य विश्रामहेतोः कतिपयान् दिवसानतिष्ठत्।

१६ महाश्वेतादर्शनम्

एकदा तु तत्रस्थः एव चन्द्रापीडः इन्द्रायुधमारुह्य मृगया-निर्गतो विचरन् कानने शैलशिखरावतीर्णं यदृच्छया किन्नरमिथुनमद्राक्षीत्। अपूर्वदर्शनतया तु समुपजातकुतूहलः, कृतग्रहणाभिलाषः, तत्समीपमुपससर्प। अदृष्टपूर्वपुरुषदर्शनत्रासप्रधावितं च तत्पलायमानमनुसरन्, एकाकी निर्गत्य निजबलसमूहात् सुदूरमनुससार। 'अत्र गृह्यते, इदं गृहीतं, इदं गृहीतं' इति रभसाकृष्टचेताः, महाजवतया तुरंगमस्य मूहूर्तमात्रेण तस्मात् प्रदेशात् पञ्चदशयोजनमात्रमध्वानं जगाम। तच्च किन्नरमिथुनं, आलोकयतः एव अस्य, अचलतुङ्गशिखरमारुरोह।

आरूढे च तस्मिन् शनैः शनैः तदनुसारिणीं निवर्त्य दृष्टिं विधृततुरङ्गः चन्द्रापीडः तस्मिन् काले समुपारूढश्रमस्वेदार्द्रशरीरं इन्द्रायुधं आत्मानं च अवलोक्य, क्षणमिव विचार्य स्वयमेव विहस्य अचिन्तयत्।

"किमिति निरर्थकं अयं आत्मा मया शिशुना इव आयासितः? किमनेन गृहीतेन अगृहीतेन वा किन्नरयुगलेन प्रयोजनम्? यदि गृहीतमिदं ततः किम्? अथ न गृहीतं ततोऽपि किम्? अहो मे मूर्खतायाः प्रकारः! अहो बालिशचरितेषु आसक्तिः! गुर्वर्थः प्रारब्धो न परिसमाप्तः। विजिगीषुव्यापारप्रयत्नो न सिद्धः। 'कस्माच्च मया निष्प्रयोजनं इदं अनुसृतं अश्वमुखद्वयम्' इति विचार्यमाणे यत्सत्यं आत्मा एव मे परः इव हासमुपजनयति। न जाने कियता अध्वना विच्छिन्नं इतः बलं अनुयायि मे। न च आगच्छता मया तुरगवेगवशात् किन्नरमिथुने बद्धदृष्टिना अस्मिन् अविरलतरुशतशाखागुल्मलता-संतानगहने महावने पन्था निरूपितः, येन प्रतिनिवृत्य यास्यामि। न च अस्मिन् प्रदेशे प्रयत्नेनापि मर्त्यधर्मा कश्चिदासाद्यते, यः

सुवर्णपुरगामिनं पंथानं उपदेक्ष्यति । तदिदानीं प्रतिनिवृत्य दक्षिणामाशां केवलं अंगीकृत्य गन्तव्यम्। **आत्मकृतानां हि दोषाणां नियतमनुभवितव्यं फलं आत्मनैव**" इत्यवधार्य तुरंगमं व्यावर्तयामास ।

व्यावर्तिततुरंगश्च पुनश्चिंतितवान् । " अयं भगवान् भानुः अधुना नभस्तलमध्यं अलंकरोति । परिश्रान्तश्चायं इन्द्रायुधः । तदेनं तावत् कस्मिंश्चित् सरसि स्नातपीतोदकं अपनीतश्रमं कृत्वा, स्वयं च सलिलं पीत्वा, कस्यचित् तरोरधः छायायां मुहूर्तमात्रं विश्रम्य ततो गमिष्यामि " इति चिन्तयित्वा सलिलमन्विष्यन् मुहुर्मुहुः इतस्ततो दत्तदृष्टिः पर्यटन्, कंचिदध्वानं गत्वा तस्यैव कैलासशिखरिणः पूर्वोत्तरदिग्भागे अत्यायतं तरुखण्डं ददर्श । तच्च संमुखादागतेन जलसंसर्गशिशिरेण, शीकरिणा, चंदनरस-समस्पर्शेन आलिंग्यमान इव जलतरंगमारुतेन, श्रोत्रहारिभिः कलहंसानां कोलाहलैः आह्वयमान इव विवेश । प्रविश्य च तस्य तरुखण्डस्य मध्यभागे, मणिदर्पणमिव त्रैलोक्यलक्ष्म्याः, स्फटिक-भूमिगृहमिव वसुंधरादेव्याः, मुनिमनोभिरिव सज्जनगुणैरिव निर्मितं, अतिमनोहरं, आल्हादनं दृष्टेः, अच्छोदं नाम सरो दृष्ट-वान् ।

आलोकमात्रेणैव अपगतश्रमः, भूयस्तत्र दत्तदृष्टिः मनस्येवमकरोत्। "अहो निष्फलमपि मे तुरगमुखमिथुनानुसरणं, एतदालोकयतः सरः सफलतामुपगतम् । अद्य परिसमाप्तं ईक्षणयुगलस्य द्रष्टव्यदर्शन-फलम् । आलोकितः खलु रमणीयानामन्तः । दृष्टः आल्हादनीया-नामवधिः । इदं सरःसलिलं खलु अमृतमिव सर्वेन्द्रियाल्हादनसम-र्थम् । अतिविमलतया चक्षुषः प्रीतिमुपजनयति । शिशिरतया स्पर्श-सुखमुपाहरति । कमलसुगन्धितया घ्राणं आप्याययति । हंसमुखर-तया श्रुतिमानन्दयति । स्वादुतया रसनामाल्हादयति । नियतं च

अस्यैव दर्शनतृष्णया न परित्यजति भगवान् कैलासनिवासव्यसनं उमापतिः।"

इति विचारयन्नेव तस्य दक्षिणं तीरमासाद्य तुरगादवततार। अवतीर्य च, पीतसलिलस्य इंद्रायुधस्य अग्रतः कतिचित् सरस्तीरप्ररूढदूर्वाप्रवालकवलान् क्षिप्त्वा, स्वयमपि सलिलमवततार। ततश्च प्रक्षालितकरचरणयुगलः चातक इव कृत्वा जलमयमाहारं, लतामण्डपशिलातले निषसाद। मुहूर्तं विश्रान्तश्च तस्य सरसः उत्तरे तीरप्रदेशे समुच्चरन्तं, उद्ग्रीवेण इंद्रायुधेन प्रथममाकर्णितं, श्रुतिसुभगं अमानुषं गीतशब्दमशृणोत्। कुतूहलवशाच्च गीतध्वनिप्रभवजिज्ञासया कृतगमनबुद्धिः, इन्द्रायुधमारुह्य, वनहरिणैरुपदिश्यमानवर्त्मा उद्दिश्य तं गीतध्वनिमभिप्रतस्थे। क्रमेण च गत्वा तं प्रदेशं सर्वतो मरकतहरितैः पादपैः परिवृतं, भगवतः शूलपाणेः शून्यं सिद्धायतनमपश्यत्।

तच्च प्रविश्य अद्राक्षीत् अशेषत्रिभुवनवन्दितचरणं, चराचरगुरुं चतुर्मुखं भगवन्तं त्र्यम्बकम्। तस्य च दक्षिणां मूर्तिमाश्रित्य अभिमुखीं आसीनां, भस्मना कृतललाटपट्टिकां, उत्सङ्गगतां वीणामास्फालयन्तीं, प्रत्यक्षामिव गन्धर्वविद्यां, निरहंकारां अमानुषाकृतिं, दिव्यत्वात् अपरिज्ञायमानवयःप्रमाणामपि अष्टादशवर्षदेशीयामिव उपलक्ष्यमाणां कन्यकां ददर्श।

ततोऽवतीर्य, तरुशाखायां वद्ध्वा तुरङ्गं, उपसृत्य भगवते भक्त्या प्रणनाम त्रिलोचनाय। उदपादि च अस्य तस्याः कन्यकायाः रूपसंपदा कान्त्या प्रशान्त्या च आविर्भूतविस्मयस्य मनसि। "अहो **जगति जन्तूनां असमर्थितोपनतानि आपतन्ति वृत्तान्तान्तराणि**। तथा हि— मया मृगयायां यदृच्छया निरर्थकमनुबध्नता तुरगमुखमिथुनं, मानुषदुर्लभदर्शना दिव्यकन्यकेयं आलोकिता। तद्यदि मे दर्शनपथान्नापयाति ततः 'का त्वं,

किमभिधाना वा, किमर्थं वा प्रथमे वयसि प्रतिपन्नं व्रतम्' इति सर्वमेवैतदेनामुपसृत्य पृच्छामि।" इत्यवधार्य तस्यामेव स्फटिकमण्डपिकायां अन्यतमं स्तम्भमाश्रित्य समुपविष्टो गीतसमाप्त्यवसरं प्रतीक्षमाणः तस्थौ।

अथ गीतावसाने मूकीभूतवीणा सा कन्यका समुत्थाय कृतहरप्रणामा परिवृत्य चन्द्रापीडं आबभाषे। 'स्वागतमतिथये। कथमिमां भूमिं अनुप्राप्तो महाभागः? आगम्यताम्। अनुभूयतां अतिथिसत्कारः' इति। एवमुक्तस्तु तया संभाषणमात्रेणैव अनुगृहीतमात्मानं मन्यमानः, उत्थाय भक्त्या कृतप्रणामः, 'भगवति, यथाज्ञापयसि' इत्यभिधाय दर्शितविनयः शिष्य इव तां व्रजन्तीं अनुवव्राज। पदशतमात्रमिव गत्वा तमालतरुभिः अन्धकारितपुरोभागां गुहामद्राक्षीत्। तस्याश्च द्वारि शिलातले समुपविष्टः, पर्णपुटेन निर्झरात् आगृहीतं अर्घ्यसलिलं आदाय तां कन्यकां समुपस्थितामब्रवीत्। 'कृतं अतिप्रसादेन। भगवति, प्रसीद। विमुच्यतामयं अत्यादरः। त्वदीयमालोकनमपि सर्वपापप्रशमनं अघमर्षणमिव पवित्रीकरणाय अलम्' इति। अनुबध्यमानश्च तया तां सर्वामतिथिसपर्यां सप्रश्रयं प्रतिजग्राह। कृतातिथ्यया च तया परिपृष्टो दिग्विजयादारभ्य किंनरमिथुनानुसरणप्रसंगेन आगमनप्रकारमात्मनः सर्वमाचचक्षे।

ततः निर्वर्तितस्नानविधिः, अमृतरसस्वादूनि उपभुज्य फलानि, परिसमापिताहारां, शिलातले विश्रब्धमुपविष्टां तां चंद्रापीडः सविनयमब्रवीत्।

"भगवति, त्वत्प्रसादप्राप्तिप्रोत्साहितेन कुतूहलेन आकुलीक्रियमाणो मानुषतासुलभो लघिमा बलादनिच्छन्तमपि मां प्रश्नकर्मणि नियोजयति। स्वल्पापि एकदेशावस्थानकालकला परिचयमुत्पादयति। तद् यदि कथनं नातिखेदकरमिव, ततः कथनेन

आत्मानं अनुग्राह्यमिच्छामि । अतिमहत् खलु भवद्दर्शनात्प्रभृति मे कौतुकमस्मिन् विषये । कतरत् ऋषीणां, गंधर्वाणां, गुह्यकानां, अप्सरसां वा कुलमनुगृहीतं भगवत्या जन्मना ? किमर्थं वा अस्मिन् कुसुमसुकुमारे नवे वयसि व्रतग्रहणम् ? क इदं वयः ? क इदं तपः ? क चायं लावण्यातिशयः ? तद् अद्भुतमिव मे प्रतिभाति । न इदं अस्माभिः अन्यत्र दृष्टश्रुतपूर्वम् । अपनयतु नः कौतुकम् । आवेदयतु भवती सर्वमिदम् " ।

इत्येवं अभिहिता सा किमपि अन्तर्ध्यायन्ती तूष्णीं मुहूर्तामिव स्थित्वा निःश्वस्य अश्रुभिः आमीलितलोचना निःशब्दं रोदितुमारेभे । तां च प्ररुदितां दृष्ट्वा चन्द्रापीडः तत्क्षणमचिन्तयत् । "अहो दुर्निवारता व्यसनोपनिपातानाम् ! यद् ईदृशीमपि दिव्याकृतिं आत्मसात् कुर्वन्ति शरीरधर्माणं उपतापाः । इदमपरं अधिकतरं उपजनितं अतिमहत् मनसि मे कौतुकं अस्याः बाष्पसलिलपातेन " इति संवर्धितकुतूहलश्च, शोकस्मरणहेतुतां उपगतं अपराधिनमिव आत्मानं अवगच्छन्, उत्थाय प्रस्रवणात् अञ्जलिना मुखप्रक्षालनोदकं उपनिन्ये । सा तु तदनुरोधात् प्रक्षाल्य लोचने, वल्कलोपान्तेन वदनमपमृज्य शनैः प्रत्यवादीत्—

" राजपुत्र, किमनेन मम मन्दभाग्यायाः पापायाः जन्मनः प्रभृति वैराग्यवृत्तान्तेन अश्रवणीयेन श्रुतेन ? तथापि यदि महत् कुतूहलं तत् कथयामि । श्रूयताम् ।

" एतत् प्रायेण भवतः श्रुतिविषयमापतितमेव यथा विबुधसद्मनि अप्सरसो नाम कन्यकाः सन्ति इति । तासां सोमामृताग्निपवनादिसंभवानि चतुर्दश कुलानि । यत् सोमसंभूतं अप्सरसां कुलं, तस्मिन् अहं समुत्पन्ना । महाश्वेता इति मदीयं नाम । " इत्येवं आत्मनः कुलवृत्तान्तात् आरभ्य पुण्डरीकवियोगपर्यन्तं

सर्वमेव निजवृत्तान्तं आवेदयन्त्या एव तस्याः चेतनां जहार मूर्च्छा। तां च ससंभ्रमप्रसारितकरः चन्द्रापीडः विधृतवान्। अश्रुजलार्द्रेण च तदीयेन एव उत्तरीयवल्कलप्रान्तेन शनैः शनैः वीजयन् संज्ञां ग्राहितवान्। उपजातकारुण्यश्च तामवादीत्।

'भगवति, मया पापेन तवायं शोकः पुनः अभिनवतां उपनीतः। तद् अलं अनया कथया। अहमपि असमर्थः श्रोतुम्'। इत्येवमुक्ता दीर्घं उष्णं च निःश्वस्य सनिर्वेदमवादीत्।

"राजपुत्र, नूनं पापायाः मम भगवान् अन्तकोऽपि परिहरति दर्शनम्। कुतश्च मे कठिनहृदयायाः शोकः? सर्वमिदं अलीकं अस्य दुरात्मनः शठहृदयस्य। किं वा परं अतः कष्टतरं आख्येयं अन्यत् भविष्यति, यन्न शक्यते सोढुं आख्यातुं वा। अहमिदं उपरतकल्पं, परकीयमिव भारभूतं, अप्रयोजनं, अकृतज्ञं च हतशरीरं वहामि। प्रतिदिनं अर्चयन्ती देवं त्र्यम्बकं अस्यामेव गुहायां तरलिकया सह निवसामि। किं मया दृष्टया पृष्टया वा करोति महाभागः?" इत्युक्त्वा मुक्तकण्ठं अतिचिरं उच्चैः प्रारोदीत्। चन्द्रापीडस्तु प्रथममेव तस्याः रूपेण, विनयेन, दाक्षिण्येन, मधुरालापतया, निरभिमानतया, महानुभावत्वेन च उपारूढगौरवः आसीत्। तदानीं तु स स्ववृत्तान्तकथनेन तया आर्द्रीकृतहृदयः शनैः शनैः एनामभाषत।

"भगवति, क्लेशभीरुः अकृतज्ञः लोकः स्नेहसदृशं कर्म अनुष्ठातुमशक्तः, निष्फलेन अश्रुपातमात्रेण स्नेहमुपदर्शयन् रोदिति। त्वया तु कर्मणा एव सर्वमाचरन्त्या किमिव न प्रेमोचितं आचेष्टितं, येन रोदिषि? विमुक्तानि ऐश्वर्यसुखानि। आयोजितः तपसि महति आत्मा। वनिताजनदुष्करं अतिकष्टं अङ्गीकृतं अरण्यावस्थानम्।

" यदेतत् अनुमरणं नाम तदतिनिष्फलम्। मौर्ख्यस्खलितमिदम्। अत्र हि विचार्यमाणे, स्वार्थ एव प्राणपरित्यागः अयं, असह्यशोकवेदनाप्रतीकारत्वात् आत्मनः। उपरतस्य तु न कमपि गुणमावहति। न परस्परसमागमनिमित्तम्। अन्यामेव स्वकर्मफलपरिपाकोपचितां असौ अवशो नीयते भूमिम्। असौ अपि आत्मघातिनः केवलं एनसा संयुज्यते। जीवंस्तु जलाञ्जलिदानादिना बहूपकरोति उपरतस्य आत्मनश्च। स्मर तावत् प्रियां एकपत्नीं रतिं, भर्तरि मकरकेतौ हरनयनहुतभुजा दग्धेऽपि अविरहितां असुभिः, उत्तरां च पञ्चत्वं अभिमन्यौ उपगतेऽपि धृतदेहाम्, दुःशलां च जयद्रथे अर्जुनेन लोकान्तरमुपनीते अकृतप्राणपरित्यागाम्। अन्याश्च कन्यकाः भर्तृरहिताः श्रूयन्ते सहस्रशो विधृतजीविताः।

"भगवत्या तु पुनः स्वयमेव समागमसरस्वती समाकर्णिता। निःसंशयं स महात्मा पुनः प्रत्युज्जीवनार्थमेव एनं उत्क्षिप्य सुरलोकं नीतवान्। अचिंत्यो हि महात्मनां प्रभावः। न च असंभाव्यमिदं अवगन्तव्यम् भगवत्या। चिरप्रवृत्तः एष पन्थाः। अर्जुनं बभ्रुवाहनेन समरशिरसि शरापहृतप्राणं उलूपी सोच्छ्वासमकरोत्। संदीपनिद्विजतनयं अन्तकपुरात् अपहृत्य भगवान् वासुदेवः आनीतवान्। अत्रापि कथंचित् एवमेव भविष्यति। अतः नार्हसि अनिन्द्यं आत्मानं निन्दितुम्। **आपतन्ति हि संसारपथमवतीर्णानां एते वृत्तान्ताः। धीरा हि तरन्त्यापदम्।**"

एवं तां समाश्वास्य चन्द्रापीडः पुनः पप्रच्छ–'भगवति, सा तव परिचारिका वनवासव्यसनमित्रं तरलिका क्व गता?' इति। महाश्वेता अकथयत–"महाभाग, यो मया पूर्वं उपवर्णितः गंधर्वाधिपतिः चित्ररथः, तस्यास्ति दुहितृरत्नं कादम्बरी इति

नाम्ना । सा च मे जन्मनः प्रभृति परं प्रेमस्थानं, द्वितीयमिव हृदयं, बालमित्रम् । अमुना एव मे हतवृत्तान्तेन समुपजातशोका निश्चयमकार्षीत् । 'नाहं कथंचिदपि सशोकायां महाश्वेतायां आत्मनः पाणिं ग्राहयिष्यामि । यदि कथंचिदपि मां अनिच्छन्तीमपि बलात् तातः कदाचित् कस्मैचित् दातुमिच्छति तदा अहं अनशनेन वा रज्ज्वा वा विषेण वा आत्मानं उत्सक्ष्यामि' इति ।

"तदा आत्मदुहितुः कृतनिश्चयं निश्चलभाषितं श्रुत्वा चित्ररथः परं खेदमापन्नः मह्यं संदिष्टवान् 'महाश्वेते, कादम्बरीं अनुनेतुं त्वं शरणम्' इति । ततः मया 'सखि कादम्बरि, किं दुःखितमपि जनं अतितरां दुःखयसि ? जीवन्तीं इच्छसि चेत् मां तत् कुरु गुरुवचनं अवितथम्' इति संदिश्य तरलिका विसर्जिता ।" इत्युक्त्वा तूष्णीं अभवत् ।

अत्रान्तरे भगवान् उदगात् तारकाराजः । क्रमेण च उद्गते शशाङ्कमण्डले चंद्रापीडः सुप्तां आलोक्य महाश्वेतां पल्लवशयने शनैः समुपाविशत् । अस्यां वेलायां 'किं नु खलु मामंतरेण चिन्तयति वैशंपायनः, किं वा वराकी पत्रलेखा, किं वा राजपुत्रलोकः' इति चिन्तयन्नेव निद्रां ययौ ।

---

१७ कादम्बरीचन्द्रापीडौ

अथ क्षीणायां क्षपायां प्रत्युषसि एव तरलिका गन्धर्वदारकेण केयूरकनाम्ना अनुगम्यमाना महाश्वेतायाः अन्तिकं प्रादुरासीत्। परिसमाप्तजपा तु महाश्वेता पप्रच्छ ताम्। 'किं त्वया दृष्टा प्रियसखी कादम्बरी कुशलिनी? करिष्यति वा तदस्मद्वचनम्?' इति। अथ सा तरलिका मधुरया गिरा व्यजिज्ञपत्। 'भर्तृदारिके, दृष्टा खलु मया भर्तृदारिका कादम्बरी सर्वतः कुशलिनी। विज्ञापिता च निखिलं संदेशम्। आकर्ण्य च यत् तया प्रतिसंदिष्टं तत् एष तयैव विसर्जितः तस्याः एव वीणावाहकः केयूरकः कथयिष्यति।'

विरतवचसि तस्यां केयूरकोऽब्रवीत्। 'भर्तृदारिके महाश्वेते, देवी कादम्बरी त्वां विज्ञापयति। यद् इयं आगत्य मां अवदत् तरलिका तत् कथय किमयं गुरुजनवचनानुरोधः? किमिदं मच्चित्तपरीक्षणम्? अपि च यत्र भर्तृविरहविधुरा प्रियसखी महत् कृच्छ्रं अनुभवति तत्र अहं कथं आत्मसुखार्थिनी पाणिं ग्राहयिष्यामि? त्वत्प्रेम्णा गुरुवचनं अतिक्रान्तं मया' इत्युक्त्वा तूष्णीमभूत्।

महाश्वेता तु तच्छ्रुत्वा सुचिरं विचार्य 'गच्छ स्वयमेव अहं आगत्य यथार्हं आचरिष्यामि' इति उक्त्वा केयूरकं प्राहिणोत्।

गते च केयूरके महाश्वेता चन्द्रापीडं उवाच। "राजपुत्र, रमणीयो हेमकूटः। चित्रा च चित्ररथराजधानी। सरलहृदया महानुभावा च कादम्बरी। यदि नातिखेदकरमिव गमनं कलयसि, नावसीदति वा गुरु प्रयोजनम्, नार्हसि निष्फलां कर्तुं अभ्यर्थनां इमाम्। इतः मयैव सह गत्वा हेमकूटं, तत्र दृष्ट्वा कादम्बरीं, अपनीय तस्याः मोहविलसितं, एकं अहः विश्रम्य, श्वोभूते

प्रत्यागमिष्यसि । **दुःखितमपि जनं रमयन्ति सज्जन-समागमाः ।**"

इत्युक्तवतीं च एनां चन्द्रापीडोऽब्रवीत् ' भगवति, दर्शनात् प्रभृति परवान् अयं जनः कर्तव्येषु यथेष्टं अशंकितया नियुज्यताम्।' इत्यभिधाय तया सह एव उदचलत् ।

क्रमेण च गत्वा हेमकूटं, आसाद्य गन्धर्वराजकुलं, समतीत्य च काञ्चनतोरणानि सप्तकक्षान्तराणि कादम्बरीभवनं अवाप । तत्र च मध्यभागे पर्यङ्के अवस्थितां, कन्याजनेन परिवृतां, समीपे संमुखोपविष्टं ' कोऽसौ, कीदृशं अस्य रूपं, कथं च अस्य महाश्वेतया सह परिचयः'इति मुहुर्मुहुः चन्द्रापीडसंबद्धं केयूरकं पृच्छन्तीं कादम्बरीं ददर्श । तस्य तु दर्शनेनैव उल्ललास हृदयम् । आसीच्च अस्य मनसि । शेषेन्द्रियाणि अपि मे वेधसा किमिति लोचनमयान्येव न कृतानि ? एवं चिन्तयत एव अस्य, तस्या नयनयुगले निपपात चक्षुः । तदा तस्या अपि, नूनं अयं सः केयूरकेण आवेदितः इति चिन्तयन्त्याः चक्षुः तस्मिन् सुचिरं पपात ।

कादम्बरी तु महाश्वेतां स्नेहनिर्भरं चिरदर्शनजातोत्कण्ठां कण्ठे जग्राह । ततः महाश्वेता तामवादीत् । " सखि कादम्बरि, भारते वर्षे राजा तारापीडो नाम । तस्य अयं चन्द्रापीडो नाम सूनुः । दिग्विजयप्रसङ्गेन अनुगतो भूमिं इमाम् । एष च दर्शनात् प्रभृति प्रकृत्या मे निष्कारणबन्धुतां गतः । तत् विमुच्य लज्जां, अनुपजातपरिचयः इति अपहाय शङ्कां, यथा मयि, तथा अत्रापि वर्तितव्यम्। एष ते मित्रं च बान्धवश्च " इति आवेदिते तया चन्द्रापीडः प्रणामं अकरोत् ।

कादम्बरी तु सविभ्रमकृतप्रणामा, महाश्वेतया सह पर्यंके निषसाद । ससंभ्रमपरिजनोपनीतायां पीठिकायां चन्द्रापीडः

समुपाविशत् । ततः महाश्वेता कादम्बरीं अनामयं पप्रच्छ । मुहूर्तापगमे च तां अभाषत । 'सखि कादम्बरि, सर्वाभिः अस्माभिः चन्द्रापीडः आराधनीयः ।'

अत्रान्तरे च आगत्य कञ्चुकी महाश्वेतां अवोचत् । 'आयुष्मति, देवश्चित्ररथः देवी च मदिरा त्वां द्रष्टुं आह्वयतः' इति । एवं अभिहिता च गन्तुकामा महाश्वेता 'सखि, चन्द्रापीडः त्वत्प्रासादसमीपवर्तिनि क्रीडापर्वतकमणिवेश्मनि आस्ताम्' इत्यभिधाय गन्धर्वराजं द्रष्टुं ययौ ।

चन्द्रापीडोऽपि तया सहैव निर्गत्य विनोदनार्थं गीतकलाकुशलाभिः कन्यकाभिः अनुगम्यमानः, केयूरकेण उपदिश्यमानमार्गः क्रीडापर्वतकमणिमन्दिरं अगात् । तत्र च निर्वर्तितस्नानविधिः सर्वं आहारादिकं अहःकर्म चक्रे ।

अथ कृताहारश्च मरकतशिलातले समुपविष्टः, दृष्टवान् आगच्छन्तीं मदलेखाम् । सा तु चन्द्रापीडस्य अन्तिकं आगत्य उवाच । 'कुमार, स्वयं गृहीतहृदयाय किं दीयते ? तथापि इमं हारमादाय भर्तृदारिका कादम्बरी त्वत्सकाशं मां प्रेषितवती । प्रणयितां च अनेन व्यपदेशेन दर्शयति कादम्बरी, न विभवम् । अयं शेषनामा हारः कौस्तुभमणिं अपि गुणेन अतिशेते' इत्युक्त्वा च तं तस्य वक्षःस्थले बबन्ध ।

चंद्रापीडस्तु विस्मयमानः प्रत्यवादीत् । 'मदलेखे, किमुच्यते ? निपुणासि । जानासि ग्राहयितुम् । अतिदक्षिणायाः खलु देव्याः कादम्बर्याः गुणाः न कंचित् न दासीकुर्वन्ति ।' इत्युक्त्वा च कादम्बरीसंबद्धाभिः एव कथाभिः सुचिरं स्थित्वा विसर्जयांबभूव मदलेखाम् ।

ततः अचिरादेव उदगात् श्वेतभानुः । चन्द्रापीडः

मुक्ताशिलापट्टं चन्द्रशीतलं अधिशिश्ये । महाश्वेतायाश्च सुजनतां, कादंबर्याश्च निष्कारणवत्सलतां, गंधर्वराजलोकस्य च रम्यतां मनसा भावयन् क्षणादिव क्षणदां क्षपितवान् ।

अथ उदिते सवितरि चन्द्रापीडः शिलातलादुत्थाय प्रक्षालित-मुखकमलः, महाश्वेतया सह अवातिष्ठमानां कादम्बरीं आलोकयितुं आजगाम । स्थित्वा च तत्र कंचित् कालं महाश्वेताया वदनं विलोक्य मन्दस्मितं अकरोत् । असौ तु तावता एव विदिताभिप्राया कादम्बरीं अब्रवीत् । 'सखि, भवत्याः गुणैः चन्द्रापीडः चन्द्रकान्त इव चन्द्रमयूखैः आर्द्रीकृतः न शक्नोति वक्तुम् । जिगमिषति खलु कुमारः । पृष्ठतः दुःखं अविदितवृत्तान्तं राजचक्रं आस्ते । अपि च युवयोः दूरस्थितयोः अपि स्थिता इयं इदानीं कुमुदिनी-कुमदनाथयोः इव प्रीतिः आ प्रलयात् । अतः अभ्यनुजानातु भवती' इति ।

अथ कादम्बरी 'सखि महाश्वेते, स्वाधीनोऽयं जनः कुमारस्य, क इव अत्र अनुरोधः ?' इति अभिधाय, गन्धर्वकुमारान् आहूय 'प्रापयत कुमारं स्वां भूमिं' इति आदिदेश । चन्द्रापीडोऽपि उत्थाय प्रणम्य 'देवि, किं ब्रवीमि ? **बहुभाषिणि न श्रद्दधाति लोकः** । स्मर्तव्योऽस्मि परिजनकथासु' इत्यभिधाय केयूरकेण उपनीतं वाजिनं आरुह्य, कादम्बर्या प्रेमस्निग्धेन चक्षुषा गृह्यमाणो हेमकूटात् प्रवृत्तो गन्तुम् ।

१८ शेषहारविस्मृतिः

अथ चन्द्रापीडः क्रमेण च प्राप्य महाश्वेताश्रमं, अच्छोदसरस्तीरे संनिविष्टं इन्द्रायुधखुरपुटानुसारेण एव आगतं आत्मस्कन्धावारं अपश्यत्। सकुतूहलेन, सानन्देन, सविस्मयेन च, स्कंधावारवर्तिना जनेन प्रणम्यमानः स्वभवनं विवेश। संमानितराजलोकश्च वैशंपायनेन पत्रलेखया च सह, 'एवं महाश्वेता, एवं कादम्बरी, एवं मदलेखा' इति अनया एव कथया प्रायो दिवसमनैषीत्। कादम्बरीं च चेतसा चिन्तयतः एव सा जगाम रात्रिः।

अपरेद्युश्च समुत्थिते भगवति रवौ सहसा एव प्रतीहारेण सह प्रविशन्तं केयूरकं ददर्श। दूरादेव च क्षितितलस्पर्शिना मौलिना कृतपादपतनं 'एहि एहि' इत्युक्त्वा तं आलिलिङ्ग गाढम्। उपावेशयत् च एनं आत्मनः समीपे एव। पप्रच्छ च—'केयूरक, कथय, कुशलिनी देवी कादम्बरी भगवती महाश्वेता च?' इति। असौ तु तेन राजसूनोः स्मितेनैव स्नापित इव सद्य एव अपगताध्वखेदः प्रणम्य अवोचत्।

'अद्य कुशलिनी यां एवं देवः पृच्छति। संदिष्टं च तव महाश्वेतया। बलवदस्वस्थशरीरा कादम्बरी। स्मरति च स्मेराननं त्वाम्। अपि च भवन्तं द्रष्टुं इच्छति मे हृदयम्। एष देवस्य शयनीये विस्मृतः शेषो हारः प्रहितः' इत्युक्त्वा तं चामरग्राहिण्याः करे शेषं समर्पितवान्।

अथ चंद्रापीडः तमेव कण्ठे हारमकरोत्। आगृहीतताम्बूलश्च मुहूर्तादिव उत्थाय जिगमिषुः 'अश्वः अश्वः' इति वदन् भवनात् निर्ययौ। त्वरिततुरगपरिचारकोपनीतं च इन्द्रायुधं आरुह्य, पश्चात् आरोप्य पत्रलेखां, स्कंधावारे स्थापयित्वा वैशंपायनं

केयूरकेण अनुगम्यमानः हेमकूटं ययौ । आसाद्य च कादम्बरी-भवनद्वारं अवततार तुरगात् । पत्रलेखया च अनुगम्यमानः हिमगृहं गत्वा कुसुमशयने समुपविष्टां कादम्बरीं पूर्ववदेव दर्शितविनयः प्रणनाम । अथ केयूरकोऽब्रवीत् । 'देवि, देवस्य चन्द्रापीडस्य पत्रलेखा नाम ताम्बूलकरङ्कवाहिनी इयं' इति अभिधाय पत्रलेखां अदर्शयत् । अथ कादम्बरी दृष्ट्वा तां 'अहो मानुषीषु पक्षपातः प्रजापतेः' इति चिन्तयांबभूव । कृतप्रणामां च तां 'एहि एहि' इत्यभिधाय आत्मनः समीपे पृष्ठतः समुपावेशयत् । चन्द्रापीडदर्शनेनैव आश्वासिता, शालीनतां च अवलम्बमाना तूष्णीमेव आसीत् । केवलं स्मितालोकं अकरोत् । चंद्रापीडस्तु महाश्वेतया सह चतुराभिः कथाभिः महान्तं कालं स्थित्वा महता यत्नेन मोचयित्वा आत्मानं स्कंधावारगमनाय कादम्बरीभवनात् निर्ययौ ।

निर्गतं च तुरंगं आरुरुक्षन्तं पश्चात् आगत्य केयूरकोऽभिहितवान् । 'देवी कादम्बरी प्रथमदर्शनजनितप्रीतिः पत्रलेखां निवर्त्यमानां इच्छति, सा च पश्चात् यास्यति इति । श्रुत्वा देवः प्रमाणम्।' इत्याकर्ण्य चन्द्रापीडः 'केयूरक, धन्या स्पृहणीया च पत्रलेखा, यां एवं अनुबध्नाति दुर्लभो देवीप्रसादः । प्रवेश्यतां' इत्यभिधाय पुनः स्कंधावारमेव आजगाम ।

१९ तारापीडपत्रम्

अथ चंद्रापीडः स्कंधावारं प्रविशन्नेव पितुः समीपात् आगतं आलेखहारकं अद्राक्षीत्। धृततुरङ्गमश्च दूरादेव अपृच्छत्। 'अङ्क, कच्चित् कुशली तातः सह अम्बया?' अथ असौ उपसृत्य प्रणामानन्तरं लेखं अर्पयांबभूव। युवराजस्तु शिरसि कृत्वा तं च स्वयमेव उन्मुच्य क्रमशः पपाठ।

स्वस्ति। उज्जयिनीतः महाराजाधिराजः देवः तारापीडः सर्वसंपदां आयतनं चन्द्रापीडं उत्तमाङ्गे चुंबन् नन्दयति।

कुशलिन्यः प्रजाः। किन्तु कियानपि कालो भवतो दृष्टस्य। बलवदुत्कंठितं नो हृदयम्। देवी च म्लानिं उपनीता। अतः लेखनवाचनविरतिरेव प्रयाणकालतां नेतव्या इति।

अथ चन्द्रापीडः 'यथाज्ञापयति तातः' इत्युक्त्वा तथैव च तुरगाधिरूढः प्रयाणपटहं अवादयत्। समीपे स्थितं च बलाधिकृतं मेघनादं आदिदेश। 'भवता पत्रलेखया सह आगन्तव्यम्। केयूरकः तां आदाय एतावतीं भूमिं आगमिष्यति। केयूरकमुखेन विज्ञाप्या देवी कादम्बरी। सर्वथा गतोऽस्मि पितुरादेशात् उज्जयिनीम्। प्रसंगतो सज्जनकथाकीर्तनेषु स्मर्तव्यः खलु चन्द्रापीडः। मा एवं मंस्थाः यथा जीवन् पुनः देवीचरणारविन्दवन्दनानन्दं अननुभूय स्थास्यति चन्द्रापीडः' इति।

एवं आदिश्य तं, शनैः शनैः आगन्तव्यं इत्युक्त्वा वैशंपायनं स्कन्धावारभारे न्ययुङ्क्त। स्वयमपि च लेखहारकं उज्जयिनीवार्तां पृच्छन् प्रतस्थे।

२० जरद्द्रविडधार्मिकः

अथ चन्द्रापीडः उज्जयिनीमार्गे महान्तं रक्तध्वजं दूरत एव ददर्श। तदभिमुखश्च कंचिदध्वानं गत्वा चण्डिकायतनं अपश्यत्। ततः अवतीर्य तुरगात्, प्रविश्य भक्तिप्रवणेन चेतसा चण्डिकां प्रणनाम। कृतप्रदक्षिणश्च इतस्ततः परिभ्रमन्, उच्चैः आरटन्तं आक्रोशन्तं च कुपितं द्रविडधार्मिकं एकदेशे ददर्श। दृष्ट्वा तं कादम्बरीविरहदूयमानोऽपि सुचिरं जहास। क्रमेण जन्मभूमिं, जातिं, विद्यां च कलत्रं, अपत्यानि, प्रव्रज्यायाश्च कारणं स्वयमेव तं पप्रच्छ। पृष्टश्च असौ अवर्णयत् आत्मानम्। अतीतस्वशौर्यरूपविभववर्णनवाचालेन तेन सुतरां अरज्यत राजपुत्रः। अस्तं उपगते च सप्तसप्तौ, पीतोदकस्य संयतस्य च इन्द्रायुधस्य पुरः शयनीयं अगात्। किन्तु अनुपजातनिद्र एव तां अनयत् निशाम्।

उषसि च उत्थाय, तस्य द्रविडधार्मिकस्य इच्छया निसृष्टैः धनविसरैः पूरयित्वा मनोरथं अभिरमणीयेषु प्रदेशेषु निवसन् अल्पैः एव अहोभिः उज्जयिनीं आजगाम।

---

२१ उज्जयिनीप्रत्यागमनम्

ततः आकस्मिकागमनप्रहृष्टसंभ्रान्तानां पौराणां नमस्काराञ्जलिसहस्राणि प्रतीच्छन् अतर्कित एव चन्द्रापीडो विवेश नगरम्। अहमहमिकया च प्रधावितात् परिजनात् एव 'द्वारि चन्द्रापीडो वर्तते' इति उपलभ्य पिता निर्भरानन्देन चरणाभ्यामेव प्रत्युज्जगाम। अथ तेन प्रसारितभुजेन 'एहि एहि' इति आहूय कृतनमस्कारः करे गृहीत्वा विलासवतीभवनं अनीयत। तत्र दिग्विजयसंबद्धाभिः एव कथाभिः कंचित् कालं स्थित्वा

सर्वाः स्नानादिकाः क्रियाः निरवर्तयत्। अपराह्णे निजमेव भवनं अयासीत्। तत्र कादम्बर्या विना अवन्तीनगरं शून्यं मन्यमानः, तद्वार्ताश्रवणोत्सुकः पत्रलेखागमनं प्रत्यपालयत्।

ततः कतिपयदिवसापगमे मेघनादः पत्रलेखां आदाय आगच्छत्। कृतनमस्कारां समुपविष्टां च तामब्रवीत्। 'पत्रलेखे, कथय तत्रभवत्याः महाश्वेतायाः देव्याः कादम्बर्याश्च कुशलम्। आगते मयि का वा गोष्ठ्यः तत्र समभवन्' साऽब्रवीत्। "केयूरकमुखात् देवस्य गमनं निशम्य कादम्बरी वज्राहतेव विक्लवा मां अवदत्। 'पत्रलेखे, देवेन एतदवस्थां देवीं दूरीकुर्वता किमिदं आपन्नवत्सलायाः स्वप्रकृतेः अनुरूपं कृतम्?' इति एवंवादिनीं तां अहमवोचम्। 'देवि, प्रसीद, संदिश, प्रेषय माम्। यामि, आनयामि तं देवं चन्द्रापीडं ते हृदयदयितम्' इति। सा अब्रवीत् 'पत्रलेखे, किं संदिशामि? साधय समीहितम्' इत्यभिधाय मां व्यसर्जयत्" इति।

चन्द्रापीडस्तु तथा उपालम्भगर्भं विज्ञप्तः पत्रलेखया स्वभावधीरप्रकृतिरपि नितरां पर्याकुलोऽभवत्। तां च अवोचत्। 'पत्रलेखे, किं करोमि? मन्ये ममापि मनोव्यामोहकारी कोऽपि शापः एव अयम्। सर्व एव मम दोषः। तत् अधुना प्राणैः अपि उपयुज्यमानः तथा करोमि, यथा न निष्ठुरहृदयं जानाति मां देवी।' इत्येवं वदत्येव चन्द्रापीडे, प्रविश्य प्रतीहारी व्यज्ञापयत्। 'युवराज, एवं समादिशति देवी विलासवती। श्रुतं मया पत्रलेखा अत्र पुनः परागता इति। अपि च तवापि कापि महती वेला वर्तते द्रष्टुस्य। तत् अनया सह एव आगच्छ' इति। चन्द्रापीडस्तु तदाकर्ण्य चेतसि अकरोत्। 'अहो, संशयदोलारूढं मे जीवितम्। एवं अम्बा निमेषमपि मां अपश्यन्ती दुःखमास्ते। पत्रलेखामुखेन च एवं आज्ञापितं आगमनाय मे देवीप्रसादेन। बलवान् जननीस्नेहः। अमोच्यं तावत् तातचरणशुश्रूषासुखम्।

अनुरक्ताः प्रजाः। गरीयान् गंधर्वराजसुतानुरागः। दुस्त्यजा जन्मभूमिः। परिग्राह्या देवी कादम्बरी।' इत्येवं चिन्तयन् एव पत्रलेखाकरावलम्बी जननीसमीपं अगात्। तत्र च तं दिवसमनयत्।

---

२२ केयूरकागमनप्रयोजनम्

एकदा चन्द्रापीडः निर्गत्य बहिःनगर्याः पत्रलेखया सह क्षिप्रातटानि अनुसरन् अतिदूरमिव चरणाभ्यां बभ्राम। भ्राम्यंश्च रयेण आगच्छन्तं तुरंगं अद्राक्षीत्। ततः पत्रलेखां अवादीत्। 'पत्रलेखे, पश्य यः एषः पुरः एव अश्ववारः ज्ञायते केयूरकोऽयम्' इति। यावत् तया सह एवं निरूपयति तावत् एव समुपससार केयूरकः। तं सस्पृहं आलोक्य चंद्रापीडः अवादीत्। 'केयूरक, कथय देव्याः कादम्बर्याः महाश्वेतायाश्च संदेशम्।' केयूरकः अगादीत्।

"देव, किं विज्ञापयामि। नास्ति मयि संदेशलवोऽपि देव्याः कादम्बर्याः महाश्वेतायाः वा। यदा एव पत्रलेखां मेघनादाय समर्प्य आगतेन प्रतिनिवृत्य मया अयं देवस्य उज्जयिनीगमनवृत्तान्तो निवेदितः, तदा एव ऊर्ध्वं विलोक्य, दीर्घं उष्णं च निःश्वस्य सानिर्वेदं 'एवं एतत्!' इति उक्त्वा उत्थाय महाश्वेता पुनः तपसे स्वमेव आश्रमपदमाजगाम। देवी अपि कादम्बरी झटिति हृदये अयोघनेन इव अभिहता, मूर्च्छितेव अविदितमहाश्वेतागमनवृत्तान्ता सकलं एव तं दिवसं अस्थात्। परेद्युश्च प्रातः एव उपसृतं मां 'किं मे पुरः तिष्ठसि?' इति तर्जयन्ती इव कोपपर्याकुलया दृष्ट्या चिरं मां आलोकितवती। तथा दृष्टश्च तया दुःखितया देव्या, आदिष्टं एव गमनाय आत्मानं मन्यमानः

अहं, अनिवेद्य एव देव्यै देवपादमूलं उपागतोऽस्मि।"

इति आवेदयन्तं केयूरकं चंद्रापीडः उवाच 'भवतु, संप्रति न शक्नोमि अतः परं श्रोतुम्। किं करोमि? केयूरक, किं आकलयसि? यावद्वयं परापतामः, तावत् प्राणान् संधारयिष्यति देवी कादम्बरी? न जाने निमेषेण एव किं भवति' इति। स तु व्यज्ञपयत्। 'देव, धैर्यं समवलम्ब्य गमनाय यत्नः क्रियताम्। तस्याः हि त्वदालोकनेच्छा निमेषितुं अपि न ददाति। समागमाशया एव अवष्टब्धं हृदयम्।' एवं वदन्तं एव आदिदेश विश्रान्तये केयूरकम्। आत्मनापि गमनचिन्तां प्राविशत्। "यदि तावत् अकथयित्वा अपक्रम्य गच्छामि, ततः गतस्यापि मम कुतः सुखम्? तातेन स्वभुजात् अवारोप्य मय्येव राज्यभारः समारोपितः। अथ आवेद्य तातस्य अम्बायाश्च ताभ्यां च विसर्जितः गच्छामि, तत्रापि किं कथयामि? 'मम स्नेहदुःखिता गंधर्वराजपुत्री कादम्बरी मां उद्दिश्य दुःखं तिष्ठति' इति। किं वा 'बलवान् मे तस्यां अनुरागः न तया विना अहं प्राणान् संधारयामि' इति। अपरोऽपि वा कश्चिद् व्यपदेशः न शक्यते एव पुनर्गमनाय कर्तुम्। संप्रत्येव समधिकात् वर्षत्रयात् प्रसाध्य वसुधां प्रत्यागतोऽस्मि। अकथयित्वा च गमनकारणं कथं आत्मानं मोचयामि?। कथं मां मुञ्चतु तातः अम्बा वा? किं करोमि एकाकी? कं पृच्छामि? को मे समुपदिशतु? वैशंपायनोऽपि असन्निहितः पार्श्वे मे। केन वा अपरेण सह समानदुःखो भवामि?" इत्येवं चिन्तयतः एव अस्य सा निशा दुःखदीर्घापि क्षयमगमत्।

प्रातरेव च किंवदन्तीं शुश्राव चन्द्रापीडः यथा किल दशपुरं यावत् परागतः स्कंधावार इति। तां च श्रुत्वा चकार चेतसि। अहो विधेर्भगवतः अनुग्राह्योऽस्मि, यस्य मे परागतः द्वितीयं हृदयं वैशंपायनः इति। प्रहर्षपरवशश्च प्रविशन्तं आलोक्य केयूरक-

मवादीत्। 'केयूरक, करतलवर्तिनीं सिद्धिं अधुना अवधारय। प्राप्तो वैशंपायनः' इति।

स तु तदाकर्ण्य 'भद्रकं आपतितं' इत्यभिधाय व्यज्ञपयत्। 'अवश्यं देवस्य देवीप्राप्त्या भवितव्यम्। केन कदा वा अवलोकितः ज्योत्स्नारहितश्चन्द्रमाः? चेतसा तु अग्रतः गतः एव देवः। शरीरेणापि अनुपदं उच्चलितः एव। अतः विज्ञापयामि। किमपरं मया अत्र साधनीयम्? तत् देवागमनोत्सवावेदनाय गमनानुज्ञया प्रसादं क्रियमाणं इच्छति मे हृदयं इदानीमेव।'

इति विज्ञापिते केयूरकेण चन्द्रापीडः प्रत्युवाच। 'किमुच्यते? कस्य अपरस्य ईदृशी देशकालज्ञता? को वा अपरः अस्मासु एवं निर्व्याजभक्तिः? तत् साधु चिन्तितम्। गम्यतां देव्याः प्राणसंधारणाय। मदागमनप्रत्ययार्थं च पत्रलेखा अपि त्वयैव सह प्रयातु देवीपादमूलम्' इत्यभिधाय मेघनादमाहूय तं आदिदेश। 'मेघनाद, यस्यां भूमौ पत्रलेखानयनाय पूर्वं मया त्वं स्थापितः, तां भूमिं यावत्, पत्रलेखां आदाय केयूरकेण सह अग्रतो गच्छ। अहमपि वैशंपायनमालोक्य अनुपदं ते परागतः।' इत्यादिश्य, पत्रलेखां अभिमुखो भूत्वा अभाषत। 'पत्रलेखे, मम जीवितं तवैव हस्ते वर्तते। शिरसा प्रणम्य विज्ञाप्या देवी कादम्बरी। यथा च मे न निष्फलं आगमनं भवति, तथा देव्या आत्मसंधारणाय आत्मना एव यत्नः कार्यः' इति संदिश्य, केयूरकं सस्नेहं परिष्वज्य, आत्मकर्णादपनीय अनेकवर्णरुचिरं संदेशमिव कर्णाभरणं अस्य कर्णे कृत्वा, 'महाश्वेताश्रमं यावत्, पुनः त्वयैव सह अनया मन्नयनाय आगन्तव्यम्' इति आदिश्य व्यसर्जयत्।

---

२३ चन्द्रापीडः वैशंपायनं प्रत्युद्गच्छति

निर्गतायां च केयूरकेण सह पत्रलेखायां, चन्द्रापीडः शून्यहृदयः क्षणमिव स्थित्वा वैशंपायनस्य प्रत्युद्गमनाय आत्मानं मोचयितुं पितुः पादमूलमगात्। अथ तारापीडः कृतप्रणामं चन्द्रापीडं आलोक्य, पार्श्वे भूमौ एव समुपाविशन्तं आकृष्य, हठात् पादपीठे समुपवेश्य शुकनासमवादीत्।

'शुकनास, पश्य इयं आयुष्मतः चंद्रापीडस्य लक्ष्मच्छायेव चन्द्रमसः, मधुकरावलीव कमलाकरस्य, श्मश्रुराजिलेखा। विवाहमङ्गलयोग्यां दशां आरूढोऽयम्। तद्देव्या विलासवत्या सह संमन्त्र्य निरूप्यतां काचित् जगतीपतिकन्यका। संप्रति वधूमुखकमलदर्शनेन आनन्दयामः आत्मानम्।'

इत्युक्तवति तारापीडे शुकनासः प्रत्युवाच। 'साधु चिन्तितं देवेन। अनेन तु संभाविताः सर्वाः कलाः। गृहीताः एव सर्वदिग्वधूनां कराः। स्थापिता एव कुटुम्बिनीपदे राजलक्ष्मीः। किं अतः परं अवशिष्यते, येन अनेन न परिणीयते?'

इत्यभिहितवति शुकनासे लज्जावनम्रवदनः चन्द्रापीडश्चकार चेतसि—'अहो, मम कादम्बरीसमागमोपायचिन्तासमकालं एव ईदृशी तातस्य बुद्धिरुत्पन्ना। तत् यदुच्यते, वनगहनप्रविष्टस्य देशिकदर्शनम्, महार्णवपतितस्य यानपात्राभ्यागमः तदेव आपतितं मयि' इति।

ततः शुकनासमुखेन एव वैशंपायनप्रत्युद्गमनाय आत्मानं मोचयित्वा गमनसंज्ञाशंखनादाय आदिदेश चन्द्रापीडः। अचिराच्च इन्द्रायुधं आरुह्य निर्जगाम नगर्याः। निर्गत्य च, उत्तीर्य शिप्रां दशपुरगामिना मार्गेण प्रावर्तत गन्तुम्। अथ अपररात्रवेलया योजनत्रितयं लङ्घयित्वा, सहसा एव अग्रतः स्कंधावारमद्राक्षीत्।

दृष्ट्वा च अकरोत् चेतसि। 'अहो! भद्रकं भवति यत् अचिन्तितागमनः एव प्रविश्य वैशंपायनं पश्यामि।' इत्येवं चिन्तयित्वा मूर्धानं आवृत्य उत्तरीयेण, नानाव्यापारव्यग्र-सकललोकं स्कंधावारं आससाद। प्रविशंश्च, 'कस्मिन् देशे वैशंपायनावासः?' इति पप्रच्छ। ततः तत्संनिहिताभिः स्त्रीभिः अप्रत्यभिज्ञाय 'भद्र, किं पृच्छसि? कुतोऽत्र वैशंपायनः?' इति आवेद्यमानः, 'आः पापाः, किं एवं असंबद्धं प्रलपथ?' इति शून्यहृदयः एव, उत्त्रस्तः इव हरिणशावकः, धेनुविरहात् उत्कर्णः इव तर्णकः, न किंचित् पश्यन्, 'किमर्थं आगतोऽस्मि, क्व गच्छामि,' इति सर्वमेव अचिन्तयमानः, अन्धः इव, मूकः इव कटकमध्यदेशं यावत् अवहत्।

अथ इन्द्रायुधप्रत्यभिज्ञानात्, वार्तया एव अनुप्रधावितराज-पुत्रदर्शनाच्च 'देवः चन्द्रापीडः' इति ससंभ्रमप्रधावितानां शून्य-दृष्टीनां राजन्यसहस्राणां मुखानि अवलोक्य 'क्व वैशंपायनः?' इति सः अपृच्छत्। ततस्ते सर्वे 'अस्मिन् तरुतले अवतरतु तावत् देवः, ततः यथावस्थितं विज्ञापयामः' इति न्यवेदयन्।

चन्द्रापीडस्तु अन्तर्दह्यमान इव, तुरगात् अवतीर्य चकार चेतसि। 'अहो! मे रम्योऽपि अरमणीयः संवृत्तो जीवलोकः। को मे ददातु पुनः तादृशं मित्ररत्नम्? कं आलपामि? किं आत्मानं आहत्य हठात् प्राणैर्वियोजयामि?' इत्येतानि चान्यानि च अधोमुखः एव विकल्प्य तान् अप्राक्षीत्। 'मयि आगते किं कश्चित् गुरुतरः संग्रामः अन्तरे समुत्पन्नः? व्याधिर्वा कश्चित् असाध्यरूपः समुपजातः?' इति।

ते तु एवं पृष्टाः व्यज्ञपयन्। 'देव, शान्तं पापम्! देवशरीरं इव वर्षशतं ध्रियते वैशंपायनः' इति। एतदाकर्ण्य चन्द्रापीडः आनन्दनिर्भरः तानवादीत्। 'अधुना किं वृत्तं अस्य, येन असौ

नागतः? कथं वा तं एकाकिनं उत्सृज्य आयाता भवन्तः?' ते च एवं पृष्टाः व्यज्ञपयन्।

"देव, श्रूयतां यथावृत्तम्। 'वैशंपायनेन सह भवद्भिः आगन्तव्यं' इति आदिश्य गतवति देवे, अन्यस्मिन् अहनि, प्रातरेव अस्मान् वैशंपायनः अभ्यधात्। 'अतिपुण्यं हि अच्छोदसरः पुराणे श्रूयते। तत् अस्मिन् स्नात्वा प्रणम्य भगवन्तं महेश्वरं, व्रजामः। दिव्यजनसेविता केन कदा पुनः स्वप्नेऽपि भूमिः इयं आलोकिता।' इत्यभिधाय चरणाभ्यामेव अच्छोदसरस्तीरमयासीत्। तत्र च अतिरम्यतया सर्वतो दत्तदृष्टिः तटलतामण्डपमद्राक्षीत्।

"दृष्ट्वा च तं विस्मृतनिमेषेण चक्षुषा विलोकयन् किमपि अन्तरात्मना स्मरन् इव तूष्णीं अधोमुखस्तस्थौ। तथावस्थितं च तमवलोक्य अवदाम वयम्। 'प्रयाणाभिमुखः सकलः स्कंधावारः त्वां प्रतिपालयन् आस्ते। अतिमहती वेला जाता। किं अद्यापि विलम्बितेन?' इति। स तु एवं उक्तः न किंचिदपि प्रत्युत्तरं अदात्।

"पुनः पुनश्च अस्माभिः आगमनाय अनुरुध्यमानः आह स्म। 'मया तु न यातव्यं अस्मात् प्रदेशात्। गच्छन्तु भवन्तः स्कन्धावारं आदाय। अनेन एव क्षणेन सर्वत्र विगलितं मे प्रभुत्वम्। तथा हि स्मरत् इव किमपि, मनो नान्यत्र प्रवर्तते। निगडितौ इव अन्यत्र पदमपि न दातुं चरणौ उत्सहेते। अथ बलात् भवन्तः मां निर्नीपवः, तत्रापि जीवितधारणं न संभावयामि। शपामि वयस्यचन्द्रापीडस्यैव जीवितेन यदि किंचिदपि जानामि यत् केन कारणेन न शक्नोमि अतो गन्तुं' इत्युक्त्वा किमपि नष्टमिव अन्विष्यन् अनन्यदृष्टिः बभ्राम। वयमपि तत्प्रतिबोधनप्रत्याशया दिनत्रयं स्थित्वा तत्परिकरं तत्र स्थापयित्वा आगताः" इति।

चन्द्रापीडस्य तु तं स्वप्नेऽपि अनुत्प्रेक्षणीयं वैशंपायनवृत्तान्तं आकर्ण्य उदपादि चेतसि। 'किं पुनः ईदृशस्य वैराग्यस्य कारणं भवेत् ? स्वीयं च न पश्यामि किंचित् स्खलितम्। प्रशमस्यापि ईदृशस्य नैष कालः। अद्याप्यसौ विद्वज्जनोचिते गार्हस्थ्ये एव न निवेशितः। न जीवलोकसुखानि अनुभूतानि। किमेतत् तेन कृतम् ?' इति आक्षिप्तचेताः विसर्ज्य सकलमेव राजकं चिन्तामेव अविशत्। 'यदि तावत् अस्मात् एव प्रदेशात् गच्छामि तदा मयापि वैशंपायनस्य अनुकृतं भवति। निवृत्य पुनर्गमने च अमुक्तिपक्षं आशंकते मे हृदयम्। अथवा अस्थाने एव मे शंका। वैशंपायनप्रत्यानयनाय यान्तं न तातो न अम्बापि निवारयितुं शक्नोति माम्। गतश्च वैशंपायनसहितः अग्रतः कादम्बरीसमीपं गमिष्यामि।'

इति निश्चित्य वैशंपायनवियोगदुःखं परिणामसुखं औषधमिव बहु मन्यमानः प्रभातसमये परापतितवान् उज्जयिनीम्।

---

२४ कस्य दोषः ?

अथ दूरत एव नगरीनिर्गतैः आर्त्या पृच्छ्यमानं कथ्यमानं च वैशंपायनवृत्तान्तमेव समन्तात् शुश्राव चन्द्रापीडः। शृण्वंश्च चकार चेतसि। 'बाह्यस्य तावत् जनस्य इयं ईदृशी समवस्था। किं पुनः येन असौ अंकेन लालितः संवर्धितः वा ? तत् अतिकष्टं मे वैशंपायनेन विना तातस्य शुकनासस्य अम्बायाः मनोरमायाः वा दर्शनम्' इत्येवं चिन्तयन् नासाग्रनिहितदृष्टिः एव विवेश उज्जयिनीम्। अवतीर्य च, राजकुलद्वारि, विशन् एव,

'आर्यशुकनासभवनं सह देव्या विलासवत्या गतो राजा' इति शुश्राव। श्रुत्वा च तत्रैव जगाम। गच्छंश्च 'हा वत्स वैशंपायन, कथं त्वं एकाकी निर्मानुषे तस्मिन् शून्यारण्ये स्थितः? चंद्रापीडस्य उपरि कथं तव ईदृशी निःस्नेहता जाता? त्वां अपश्यन्ती न जीवामि। वत्स, यत्र ते अवस्थातुं अभिरुचितं नयस्व मामपि तत्रैव पितरं विज्ञाप्य' एतानि चान्यानि च मनोरमां विलपन्तीं अश्रौषीत्।

चन्द्रापीडः तेन च अतिकरुणेन प्रलापेन विह्वल इव कथं कथमपि प्रविश्य, अधोमुख एव प्रणम्य पितरं दूरत एव उपाविशत्। उपविष्टं च तं क्षणमिव दृष्ट्वा राजा गद्गदध्वनिना अभ्यधात्। 'चन्द्रापीड, अनुचितं इमं सुहृदः ते वृत्तान्तं आकर्ण्य त्वद्दोषं आशङ्कते मे हृदयम्।'

इत्येवंवादिनः नरपतेः आक्षिप्य वचनं, स्फुरिताधरेण शुकनासोऽब्रवीत्। 'देव, यदि चंद्रमसि ऊष्मा, अंशुमालिनि वा तमः संभाव्यते, ततः युवराजेऽपि दोषः। न हि अतः परं अपरं कष्टतरं किंचिदपि, यत् गुणेषु वर्तमानो दोषेषु संभाव्यते इतरजनेनापि किं पुनर्गुरुजनेन? जन्मनः प्रभृति देवस्य विलासवत्या देव्याश्च अङ्कलालनया यो न गृहीतः तस्य दुर्ग्रहप्रकृतेः चन्द्रापीडः किं करोतु? मातुः अहमेव एकः इति एतस्य हृदये नापतितम्। अपरं, असौ तिर्यङ् महता यत्नेन शुक इव पाठितः पुष्टश्च देवेन। तिर्यञ्चोऽपि पोषिताः पोषितारि स्नेहं आवध्नन्ति। तेऽपि कृतं जानन्ति। ईदृशाचरितेन तेनापि अवश्यमेव तिर्यग्योनौ पतितव्यम्।' इत्युक्त्वा अन्तर्मन्युपूरेण निःश्वसन् एव अवतस्थौ। तदवस्थं तं तारापीडः प्रत्युवाच।

'एतत् खलु अम्बुबिन्दुभिः आपूरणं पयोधेः, यत् अस्मद्विधैः परिबोधनं आर्यस्य। तथापि प्राज्ञस्यापि बहुश्रुतस्यापि

विवेकिनः अपि विशुद्धमपि मानसं, वर्षसलिलेन सर इव, कलुषीक्रियते सर्वस्य; न बुद्धिर्बुध्यते; येन ब्रवीमि। अन्यत्, अस्मत्तः लोकवृत्तं आर्यः एव सुतरां वेत्ति। यौवनावतारे हि शैशवेनैव सह गलति गुरुजनस्नेहः। वक्षसैव सह विस्तीर्यते वाञ्छा। दोर्द्वयेनैव सह स्थूलतां आपद्यते धीः। आकारेणैव सह आविर्भवन्ति हृदयाद्विकाराः। न प्रविशति गुरूपदेशः श्रोत्रे। किमेवं आर्येण अनुचितं अपत्यस्नेहस्य एवमुक्तम्? यत् गुरूणां मुखेभ्यः निष्क्रामति शुभं अशुभं वा, शिशुषु तदवश्यं फलति। गुरवो हि दैवतं बालानाम्। तत् उत्सृज्यतां अयं अमर्षावेगः वैशंपायनस्य उपरि। विरूपकं तु तेन न किंचिदपि आचरितम्। सर्वपरित्यागं कृत्वा स्थितः इत्येतदपि, कारणं अविज्ञाय किमेवं दोषपक्षे निक्षिपामः। आनीयतां तावदसौ। ततो यथायुक्तं विधास्यामः।'

इत्युक्तवति तारापीडे पुनः शुकनासोऽभ्यधात्। 'अत्युदारतया वत्सलत्वाच्च एवं आदिशति देवः।' इत्युक्तवति शुकनासे कशया इव अन्तस्ताडितः, उद्भ्रष्टदृष्टिः, चन्द्रापीडः शनैः शनैः शुकनासमवादीत्। 'आर्य, न मदीयेन दोषेण नागतो वैशंपायनः। अनुपदमेव स्कन्धावारं आदाय आगच्छति, इति अमुना हेतुना, विना तेन आगतोऽहम्। तत् आर्यो दापयतु मे वैशंपायनानयनाय गमनाभ्यनुज्ञां तातेन। तं आदाय आगतमेव मां अवधारयतु आर्यः।'

इति अभिहितवति चन्द्रापीडे, 'गमनाय विज्ञापयति युवराजः। किं आज्ञापयति देवः?' इति शनैः शनैः शुकनासो राजानं अप्राक्षीत्। ततः किंचिदिव ध्यात्वा तारापीडः प्रत्यवादीत्। "आर्य, मया ज्ञातं 'एतेषु दिवसेषु इन्दोः ज्योत्स्नामिव वत्सस्य वधूं द्रक्ष्यामि' इति, यावदयं अपरः वैशंपायनवृत्तान्तः दुष्प्रकृतिना विधात्रा अन्तरा पातितः। न तं अन्यः शक्नोति

आनेतुम्। तत् यातु। तत् गणकैः सह आर्यः दिवसं लग्नं च गमनाय निरूपयतु" इति।

---

२५ वैशंपायनप्रत्यानयनप्रयत्नः

चन्द्रापीडस्तु तां कादम्बरीवरणस्रजमिव गमनाभ्यनुज्ञां हृदयेन उद्वहन्, प्रहृष्टान्तरात्मा अपि अपहर्षदृष्टिः, प्रविश्य मातुः समीपे समुपविश्य पार्श्वस्थितां मनोरमां आश्वास्य अवादीत्। 'अम्ब, समाश्वसिहि। वैशंपायनानयनाय मां विसर्जय त्वम्।' सा तु एवं अभिहिता प्रत्युवाच। 'तात, कः खलु मे त्वयि तस्मिंश्च विशेषः? तदेकधा तं एकं न पश्यामि कठिनहृदयम्। त्वयि पुनर्गते च, त्वद्दर्शनमपि दूरीभवति। तन्न गन्तव्यम्। वत्स, एकेनापि युवयोः आवां पुत्रवत्यौ।'

इत्युक्तवत्यां मनोरमायां विलासवती धीरं उवाच। 'प्रियसखि, तव मम च एवं एतत् यथा त्वया उक्तम्। अयं पुनः वैशंपायनेन विना कं पश्यतु? तदास्ताम्। किं एनं निवारयसि? तत् यातु।' इत्याभिधाय मनोरमां हस्ते गृहीत्वा निजावासं अयासीत्।

चन्द्रापीडोऽपि स्वगृहं गत्वा गमनाय उत्ताम्यता हृदयेन गणकान् आहूय रहसि आज्ञापितवान्। 'यथा विना विलम्बेन मे गमनं भवति तथा भवद्भिः आर्यशुकनासाय दिनं आवेदनीयम्।' इत्येवं आदिष्टास्ते व्यज्ञापयन्। 'देव, यथा सर्वे एव ग्रहाः स्थिताः तथा अस्मन्मतेन देवस्य गमनमेव वर्तमाने न शस्यते। अपरं अपि कर्मानुरोधात् राजेच्छा एव कालः। **राजा कालस्य**

कारणम्। यस्यामेव वेलायां चित्तनिर्वृतिः सैव वेला सर्वकार्येषु।' इति विज्ञापिते मौहूर्तिकैः पुनस्तानब्रवीत्। 'तातेन एवं आदिष्टं इति ब्रवीमि। अन्यत्, कार्यपराणां प्रतिक्षणोत्पादिषु आत्ययिकेषु कार्येषु दिवसनिरूपणा एव कीदृशी? तत्तथा कथयिष्यथ यथा श्वः एव गमनं भवेत्' इति। 'देवः प्रमाणम्' इति अभिधाय गतेषु च तेषु शरीरस्थितिकरणाय उदतिष्ठत्।

अथ अन्येद्युः प्रस्थानमङ्गले प्रणामाय उपगतं चन्द्रापीडं विलासवती अवादीत्। 'तात, न ईदृशी प्रथमगमनेऽपि ते पीडा मम समुत्पन्ना, यादृशी तव गमनेन अधुना। न जानामि एव, किमुत्पश्यामि इति? किं बहुभ्यः दिवसेभ्यः कथमपि आगतः मे वत्सो झटित्येव पुनर्गच्छति इति। न च वैशंपायनानयनाय गच्छतस्ते गमनं निवारयितुं पारयति वाणी। हृदयं पुनः न इच्छति एव त्वदीयं गमनम्। तत् ईदृशीं मे पीडां विज्ञाय यथा पुरा स्थितं, न तथा दीर्घकालं आयुष्मता स्थातव्यम्।' इत्यादिशन्तीं स्वमातरं चन्द्रापीडः व्यज्ञपयत्। 'मातः, तदा दिग्विजयप्रसङ्गात् स्थितः अस्मि। अधुना पुनः इयानेव मे कालक्षेपः, यावत्तं उद्देशं परापतामि। तत् पुनः चिरागमनकृता पीडा न हृदये त्वया भावनीया।' इत्येवं विज्ञप्ता तं गाढं आलिङ्ग्य कृच्छ्रान्मुमोच माता।

मुक्तश्च मात्रा पितुर्वासभवनमगच्छत्। तत्र च तारापीडः तं चक्षुषा पिबन्निव, प्रेम्णा परिष्वज्य अवादीत्। 'वत्स, पित्रा अहं दोषेषु संभावितः इति एषा मनागपि दुःखासिका न कार्या। अस्माभिः सम्यक् परीक्ष्य एव गुणगणैः एव अधिगम्यः राज्यभारः त्वयि आरोपितः, न तनयस्नेहादेव। त्वया एव सकललोकानुरञ्जने यतितव्यम्। गतः खलु कालः अस्माकम्। अस्माभिः न पीडिताः प्रजाः लोभेन। न उद्वेजिताः गुरवो मानेन। वृत्तं

रक्षितं, न शरीरम्। वाच्यात् भीतं, न मरणात्। त्वज्जन्मना कृतार्थ एव अस्मि। तत् अयमेव मे मनोरथः दारपरिग्रहात् प्रतिष्ठिते त्वयि, सकलमेव इमं राज्यभारं आरोप्य पूर्वराजर्षिगतं पन्थानं अनुयास्यामि इति। तद्भवतेनापि तथा कर्तव्यं वत्सेन, यथा न चिरकालं एष मे मनोरथः अन्तर्हृदय एव विपरिवर्तते।' इत्यभिधाय मुखे तांबूलं अर्पयित्वा व्यसर्जयत्।

ततः अप्रभातायां एव यामिन्यां चन्द्रापीडः कृतापसर्पणं, अकृतहर्षहेषारवं, अनाविष्कृतगमनोत्साहं, दीनं, इन्द्रायुधं आलोक्यापि पुनर्निवारणशङ्कया रयेणैव निरगात् नगर्याः। निर्गत्य च शिप्रातटे तत्प्रस्थानभङ्गलावस्थानाय उपकल्पितं कायमानं अप्रविश्य बहिरेव गतो युवराजः।

---

२६ वैशंपायनान्वेषणम्

अथ चन्द्रापीडं तथागतं आलोक्य परिजनः राजपुत्रलोकः च इतस्ततः तं अनुजग्मतुः। युवराजश्च गव्यूतित्रितयमिव गत्वा सुलभपयोयवसे प्रदेशे निवासमकल्पयत्। उत्ताम्यता हृदयेन अप्रभातायां एव यामिन्यां उत्थाय पुनरवहत्। वहंश्च "वैशंपायनस्य पृष्ठतः अनुगम्य, 'क्व परं पलाय्यते?' इति तस्य वैलक्ष्यं अपनयामि, एवं तत्समागमसुखं अनुभूय पुनः महाश्वेतां पश्यामि, तया सहैव हेमकूटं गच्छामि, तत्र महाश्वेतोपपादितोद्वाहमङ्गलः कादंबरीं आलोकयन् चक्षुषी कृतार्थतां नयामि" इत्येतानि च अन्यानि च चिन्तयन् अचेतितक्षुत्पिपासाव्यथः, दिवा रात्रौ च अवहत्।

एवं च वहतोऽप्यस्य अध्वनः अर्धपथे एव आशुगमनविघ्नकारी बभूव जलदकालः। अन्धकारं अनीयन्त दश दिशः जलधरैः। तथापि घटिकामात्रमपि अकृतविलम्बः अच्छोदं आससाद। आसाद्य च उपसर्पन्नेव सर्वान् अश्ववारान् आदिदेश। 'कदाचित् असौ वैलक्ष्यात् अस्मान् आलोक्य अपसर्पत्येव। चतुर्षापि पार्श्वेषु अवहिता भवन्तु भवन्तः' इति। आत्मनापि तुरगगतः एव खिन्नः अपि अखिन्नः इव विचिन्वन् तरुमूलानि लतामण्डपांश्च समन्तात् बभ्राम। भ्राम्यंश्च यदा न कचिदपि किंचिदवस्थानचिह्नं अपि अद्राक्षीत्, तदा चकार चेतसि। 'अहो! कष्टतमं आपतितम्। वैशंपायनं अदृष्ट्वा अस्मात् प्रदेशात् पदात् पदमपि गन्तुं पादौ एव न उत्सहेते मे। कदाचित् अस्य वृत्तान्तस्य अभिज्ञा महाश्वेतापि भवति एव' इति उत्पन्ननिश्चयः, महाश्वेताश्रमं उपजगाम।

प्रविश्य च गुहाद्वारे एव शिलातले समुपविष्टां अधोमुखीं महाश्वेतां अपश्यत्। दृष्ट्वा च तां अस्य उदपादि हृदये 'मा नाम देव्याः कादम्बर्या एव किमपि अनिष्टं उत्पन्नं भवेत्, येन ईदृशी समवस्था हर्षहेतावपि मदागमने अनुभूयते महाश्वेतया' इति आशङ्काभिन्नहृदयः उपसृत्य 'किमेतत्?' इति तरलिकं अपृच्छत्। सा तु महाश्वेताया एव मुखं अवलोकितवती।

अथ महाश्वेता एव प्रत्यवादीत्। "महाभाग, किं इयं आवेदयति वराकी। यया पुरा आत्मीयदुःखं श्रावितं, सा एव अहं मन्दभाग्या भूयः श्रावयामि दुःखमिदम्। श्रूयताम्। 'केयूरकात् भवद्गमनं आकर्ण्य विदीर्णमानसा न मया चित्ररथस्य मनोरथः पूरितः, न चापि हृदयवल्लभसमागमनिर्वृता कादम्बरी वीक्षिता' इति उत्पन्नवैराग्या कष्टतरतपश्चरणाय अत्रैव आगता। आगत्य च महाभागस्य एव तुल्याकृतिं प्रनष्टमिव किमपि इतस्ततो विलोकयन्तं

ब्राह्मणयुवानं अपश्यम्। स तु मां उपसृत्य, अनुस्मरन्निव किमपि, सुचिरं आलोक्य अब्रवीत्। 'सुतनु, सर्वं एव जगति जन्मनो वयसः आकृतेर्वा सदृशं आचरन् न वचनीयतामेति। तव पुनः मालतीकुसुमसुकुमारा तनुः तपश्चरणक्लेशेन म्लानिं उपनीयते। चन्द्रमुखि, शरणमागतोऽस्मि ते। रक्ष मां त्वदायत्तजीवितम्। शरणागतपरित्राणं हि तपस्विनीनामपि धर्मः एव' इति।

"अहं तु तत् आकर्ण्य आ पादतलात् उत्कम्पितगात्रयष्टिः, तं क्रोधावेगेन अवदम्। 'आः पाप, कथं एवं गदतः न ते अवशीर्णा सहस्रधा जिह्वा? येन एव खलु हतविधिना शुकः इव वक्तुं एवं शिक्षितः, तेनैव किमिति तस्यामेव जातौ न क्षिप्तोऽसि?' इत्युक्त्वा चन्द्राभिमुखी भूत्वा कृताञ्जलिः पुनः अवदम्। 'भगवन् परमेश्वर, सकलभुवनचूडामणे, लोकपाल, यदि मया देवस्य पुण्डरीकस्य दर्शनात् प्रभृति मनसापि अपरः पुमान् न चिन्तितः, तदा अनेन मे सत्यवचनेन अयं मदुदीरितायामेव जातौ पततु' इति।

"स च मद्वचनानन्तरमेव सद्यः छिन्नमूलतरुरिव क्षितौ अपतत्। अतिक्रान्तजीविते तस्मिन् तत्परिजनतः श्रुतं यथाऽसौ महाभागस्यैव मित्रं भवति।" इत्युक्त्वा च महीं अश्रुवेगेन आप्लावितवती।

चंद्रापीडस्य तु तत् आकर्ण्य 'भगवति, न मया प्राप्तं देव्याः कादम्बर्याः चरणपरिचर्यासुखं, तत् जन्मान्तरेऽपि भगवती संपादयित्री भूयात्' इति गदतः एव हृदयं अस्फुटत्।

अथ महाश्वेतायाः शरीरं उत्सृज्य ससंभ्रमप्रतिपन्नचन्द्रापीडशरीरया, 'हा देव चन्द्राकृते, कादम्बरीप्रिय, क्व इदानीं त्वया तया विना गम्यते?' इति उन्मुक्तं आर्तवचनं तरलिकया। महाश्वेता च चन्द्रापीडमुखनिहितस्तब्धदृष्टिः निश्चेष्टा अभूत्। 'आः

पापे दुष्टतापसि, किमिदं त्वया कृतं ? देवस्य तारापीडस्य कुलं उत्सादितम्, अनाथीकृताः प्रजाः। देव, प्रसीद, परित्यज्य सर्वान् एकाकी क्व प्रस्थितोऽसि ?' इति आरटन्ति स्म परिजनाः। इन्द्रायुधस्तु चन्द्रापीडवदननिवेशितदृष्टिः, मुहुर्मुहुः दीनतरहेषारवेण आत्मनः तुरंगमतां मुमुक्षन् इव दृष्टः।

---

२७ किमाश्चर्यं अतः परम् !

अथ कादम्बरी पत्रलेखानिवेदितचन्द्रापीडागमना, व्याजीकृत्य महाश्वेतादर्शनम् मातापित्रोः पुरः, प्रतिपन्नशृंगारवेषाभरणा, नातिबहुना परिजनेन अनुगम्यमाना प्रस्थिता। सा पत्रलेखाहस्तावलम्बिनी, पुरः केयूरकेण उपदिश्यमानमार्गा, मदलेखया सह कृतालापा आसीत्। "मदलेखे, तस्य निष्ठुरहृदयस्य आगमनं एव न श्रद्दधे। तथागतः अपि असौ यत् किमपि त्वया एव वक्तव्यः। मया पुनः दृष्टोऽपि न आलपितव्यः" इति अभिदधाना एव चन्द्रापीडदर्शनाय उत्ताम्यन्ती तत्रैव महाश्वेताश्रमं आजगाम।

आगत्य च, अस्तमिततारागणमिव गगनं, उन्मुक्तजीवितं चन्द्रापीडं अद्राक्षीत्। दृष्ट्वा च तं 'हा किमिदं !' इति अधोमुखी धरातलं उपयान्ती कथं कथमपि मदलेखया अधार्यत। पत्रलेखा पुनः उन्मुच्य कादम्बरीकरतलं अचेतना क्षितिमुपागमत्।

चिरात् लब्धसंज्ञापि कादम्बरी, तथैव मूढा इव निश्चलस्तब्धदृष्टिः, स्त्रीस्वभावविरुद्धेन चेतसा चंद्रापीडवदनसमर्पिताक्षी तस्थौ। तथास्थितां च तां सपादपतनं मदलेखा अब्रवीत्। 'प्रियसखि,

बाष्पपूरे अमुच्यमाने अस्मिन्, अतिभारोत्पीडितं तडागमिव, मृदुसरसं सहस्रधा स्फुटति ते हृदयम्। अवेक्षस्व देवीं मदिरां देवं च चित्ररथम्। त्वया विना कुलद्वयमपि नास्ति।' इत्युक्तवतीं मदलेखां कादम्बरी विहस्य प्रत्यवादीत्।

"अयि, कुतोऽस्य मे वज्रसारकठिनस्य हृदयस्य स्फुटनम्, आलोक्यैव यन्न सहस्रधा स्फुटितम्? मया पुनः समासादितमिदं प्रियतमशरीरं, यत् सर्वदुःखानामेव उपशान्तये। तत् किमिति देवेनागच्छता, मदर्थं प्राणांश्च उत्सृजता गुरुतां नीतं आत्मानं अश्रुपातमात्रकेण लघूकरोमि? कथं स्वर्गगमनोन्मुखस्य देवस्य रुदितेन अमंगलं करोमि? कथं वा हर्षस्थाने रोदिमि? अस्मिन् समये मरणमेव जीवितं, जीवितं पुनर्मरणम्।

"मदलेखे, यदि ममोपरि तव स्नेहः, तत् तथा कर्तव्यं यथा न तातः अम्बा च मच्छोकात् आत्मानं परित्यजतः, यथा च मयि वांछितं मनोरथं त्वयि पूरयतः, यथा च मे सखीजनः न स्मरति तथा करिष्यसि। पुत्रकस्य मे भवनाङ्गणे सहकारपोतस्य त्वया माधवीलतया सह उद्वाहमङ्गलं निर्वर्तनीयम्। पञ्जरबन्धदुःखात् सारिका शुकश्च मोक्तव्यौ। पुत्रको मे बालहरिणः कस्मिंश्चित् तपोवने समर्पणीयः। शरीरोपकरणानि मे ब्राह्मणेभ्यः प्रतिपादनीयानि। वीणा पुनः आत्मनः एव अङ्कप्रणयिनी कार्या। अपरमपि यत्ते रोचते तदपि स्वीकर्तव्यम्। अहं पुनः चितानले देवस्य चंद्रापीडस्य कण्ठलग्ना निर्वापयामि आत्मानम्।" इति अभिदधाना एव उपसृत्य महाश्वेतां कण्ठे गृहीत्वा तां अवादीत्। "प्रियसखि, तवाऽस्ति कीदृशी अपि प्रत्याशा यया पुनः समागमकांक्षिणी दुःखानि अनुभवन्ती जीवितं धारयसि। मम पुनः सर्वतो हताशायाः सापि नास्ति। तत् आमन्त्रये प्रियसखीं पुनर्जन्मान्तरे समागमाय।"

इत्यभिधाय चन्द्रापीडचरणौ अंकेन धृतवती। अथ तत्कर-स्पर्शेन, चन्द्रापीडदेहात् झटिति किमपि चन्द्रधवलं ज्योतिरिव उज्जगाम। अनन्तरं च अंतरिक्षे अशरीरिणी वाक् अश्रूयत। 'वत्से महाश्वेते, पुनरपि त्वं मया एव समाश्वासयितव्या वर्तसे। पुण्डरीकशरीरं मल्लोके मत्तेजसा आप्यायमानं अविनाशि भूय-स्त्वत्समागमाय तिष्ठत्येव। इदं अपरं मत्तेजोमयं, कादम्बरीकर-स्पर्शेन आप्यायमानं, शापदोषात् विमुक्तमपि स्वतः एव अवि-नाशि चंद्रापीडशरीरं भवत्योः प्रत्ययार्थं आ शापक्षयात् आस्ताम्। न एतत् अग्निना संस्कार्यम्, उदके वा क्षेप्तव्यम्, प्रयत्नतः प्रति-पालनीयं आ समागमप्राप्तेः' इति।

तां तु श्रुत्वा 'किमेतत्?' इति विस्मयाक्षिप्तहृदयाः सर्वा एव गगनतलनिवेशितदृष्टयः पत्रलेखावर्जं अतिष्ठन्। पत्रलेखा तु तेन तस्य ज्योतिषः तुषारशीतलेन स्पर्शेन लब्धसंज्ञा वेगात् धावित्वा, अश्वपालककरात् आच्छिद्य इन्द्रायुधं, 'त्वं पुनः एवं दूरं प्रस्थिते देवे, क्षणमपि तिष्ठन् न शोभसे' इति अभिद-धाना तेनैव इन्द्रायुधेन सह आत्मानं अच्छोदसरसि अक्षिपत्।

अथ तयोः निमज्जनसमयानन्तरमेव तस्मात् सरःसलिलात् तापसकुमारः सहसैव उदतिष्ठत्। उत्थाय च महाश्वेतां उपसृत्य शोकगद्गदं अवादीत्। 'गंधर्वराजपुत्रि, जन्मान्तरादिवागतः अयं जनः प्रत्यभिज्ञायते न वा?' इति।

महाश्वेता तु एवं पृष्टा शोकानन्दमध्यवर्तिनी ससंभ्रमं उत्थाय कृतप्रणामा प्रत्यवादीत्। 'भगवन् कपिञ्जल, एवंविधा अहं अपुण्यवती भवन्तमपि न प्रत्यभिजानामि? तत् कथय केन असौ उत्क्षिप्य नीतः? किमर्थं वा नीतः? क्व वा वर्तते? किं वा तव उपजातं येन एतावता कालेन वार्तामपि न दत्तवानसि? कुतो वा त्वं एकाकी देवेन विना आगतः असि?' इति।

स तु एवं पृष्टः सर्वमेव शापवृत्तान्तं निवेद्य अब्रवीत्। 'गंधर्वराजपुत्रि, तुरगयोनौ समुत्पन्नस्यापि मे संज्ञा नैव अपयाता। येन मया एव चन्द्रापीडः किन्नरमिथुनानुसरणक्रमेण इह आनीतः। चंद्रमसः अवतारः चन्द्रापीडः। यः अपि असौ प्राक्तनात् अनुरागसंस्कारात् भवतीं अभिलषन् अजानत्या भवत्या शापाग्निना निर्दग्धः सोऽपि मे वयस्यस्य पुण्डरीकस्य अवतारः।

तच्छ्रुत्वा महाश्वेता 'हा देव पुण्डरीक, जन्मान्तरेऽपि ते अहमेव राक्षसी विनाशाय उपजाता। पुनः पुनस्तव व्यापादनमेव मम दीर्घजीवितप्रदाने दग्धप्रजापतेः प्रयोजनं निष्पन्नम्। कं उपयामि शरणम्? हा हतास्मि' इति सोरस्ताडनं अवनौ आत्मानं अपातयत्।

कपिञ्जलस्तु तां सानुकम्पं अवादीत्। 'गन्धर्वराजपुत्रि, कस्तवात्र दोषः?। यथा च शापदोषात् इदं उपनतं भवत्योः द्वयोरपि तथा मया कथितम्। तत् मुच्यतां अयं आत्मनः वयस्यस्य च अश्रेयस्करः शोकानुबन्धः। यदेव भवत्या अङ्गीकृतं, तदेव अनुबध्यतां तपः। **तपसो हि नास्ति असाध्यं नाम किंचित्**। देव्याः हि गौर्याः तपसः प्रभावात् स्मरारेः अपि यावत् आसादितं देहार्धपदम्। एवं त्वमपि मे वयस्यस्य अङ्के तपः प्रभावात् पदं अवाप्स्यसि' इति महाश्वेतां पर्यबोधयत्।

अथ कादम्बरी कपिञ्जलं अप्राक्षीत् 'भगवन् कपिञ्जल, पत्रलेखया त्वया च अस्मिन् सरसि जलप्रवेशः कृतः। तत् किं तस्याः वृत्तं, इति आवेदनेन प्रसादं करोतु भगवान्' इति। स तु प्रत्यवादीत्। 'राजपुत्रि,' सलिलपातात् अनन्तरं न कश्चिदपि तद्वृत्तान्तो मया ज्ञातः। तत् अधुना क्व चन्द्रापीडस्य, क्व पुण्डरीकात्मकस्य वैशंपायनस्य जन्म, किं वा अस्याः पत्रलेखायाः वृत्तं इति सर्वथा एव अस्य वृत्तान्तस्य अवगमाय गतोऽहं प्रत्यक्षलोकत्र-

यस्य तातस्य श्वेतकेतोः पादमूलम् ' । इति अभिदधानः एव गगनं उदपतत् ।

---

२८ ततः किम् ?

अथ गते कपिञ्जले कादम्बरी महाश्वेतां अवादीत् । 'प्रियसखि, तुल्यदुःखितां त्वया सह नयता न खलु असुखं स्थापिता अस्मि भगवता विधात्रा । अद्य ते वदनं दर्शयन्ती प्रियसखी इति च आभाषमाणा न लज्जे । तव अपि अहं अद्यैव प्रियसखी जाता । तत् एवं गते यत् करणीयं तदुपदिशतु मे प्रियसखी ।'

इत्युक्तवतीं कादम्बरीं महाश्वेता प्रत्यवादीत् । ' प्रियसखि, किमत्र प्रश्नेन उपदेशेन वा ? इदं चन्द्रापीडशरीरं अङ्के एव आस्ते । अस्य अनुवृत्तिं मुक्त्वा किमन्यत् करणीयम् । अप्रत्यक्षाणां हि देवतानां मृदश्मकाष्ठमय्यः प्रतिमाः श्रेयसे पूजासत्कारेण उपचर्यन्ते । किं पुनः प्रत्यक्षदेवस्य चन्द्रमसः मूर्तिः अनाराधितप्रसन्ना ?

इत्युक्तवत्यां महाश्वेतायां कादम्बरी तूष्णीमेव उत्थाय चन्द्रापीडतनुं अन्यतरस्मिन् शिलातले स्थापयित्वा, स्नानशुचिः भूत्वा, परिधाय धौतशुचिनी दुकूले, यानि सुरभिकुसुमधूपानुलेपनादीनि चन्द्रापीडस्य सुखोपभोगाय आनीतानि, तैः एव तस्य मूर्तौ देवतोचितां अपचितिं समपादयत् । अङ्के च समारोपितचरणद्वया शून्यमुखी निराहारा तं दिवसं अनयत् । यथैव च दिवसं तथैव तां क्षपामपि जाग्रती समुपविष्टा एव क्षपितवती ।

प्रातश्च तदुन्मीलितं चन्द्रापीडशरीरं अवलोक्य कादंबरी

पार्श्वस्थितां मदलेखां अवादीत्। 'अहं तु तादृशीं एव इमां तनुं अवलोकयामि तत् त्वमपि तावत् निरूपय' इति। एवमुक्ता मदलेखा तां प्रत्यवादीत्– 'प्रियसखि, किमत्र निरूपणीयम्? तादृशमेव इदं प्रसन्नं वदनम्। तथा एव इयं कान्तिः ललाटस्य। तादृशमेव लोचनद्वयम्। तथैव च इदं पाणिपादम्। तत् सत्या सा भारती, कपिञ्जलावेदितश्च शापवृत्तान्तः इति संभावयामि।'

इत्युक्तवतीं मदलेखां आनन्दनिर्भरा कादम्बरी अवादीत्। 'प्रियसखि, देवस्य शरीरं उपचरन्तीभिः अवश्यं आ शापक्षयात् अस्माभिः अत्र स्थातव्यम्। तत् इमं अत्यद्भुतं वृत्तान्तं तातस्य अम्बायाश्च गत्वा निवेदय। येन न अन्यथा मां संभावयतः दुःखेन वा मदीयेन न तिष्ठतः' इत्यभिधाय तां व्यसर्जयत्।

गत्वा आगतया च तया आवेदितम् "प्रियसखि, सिद्धं ते अभिवाञ्छितं। एवं संदिष्टं तातेन चित्ररथेन अम्बया च मदिरया 'अयमेव आवयोः परमानन्दः यद् वत्सया एव स्वयं जामाता वृतः; तत्रापि अपरं, भगवतः चन्द्रमसः अवतारः' तत् शापावसाने जामात्रा सह एव आननारविन्दं ते द्रक्ष्यावः" इति।

अथ अपगतवति जलदसमये, एकदा चन्द्रापीडचरणमूलोपविष्टां कादम्बरीं उपसृत्य मेघनादो व्यज्ञपयत्। 'देवि, देवो युवराजः चिरयति इति उत्ताम्यता हृदयेन देवेन तारापीडेन वार्ताहराः प्रहिताः।' इति विज्ञाप्य तूष्णीं स्थितवति मेघनादे, कादम्बरी प्रत्युवाच। 'तत् अविलम्बितं प्रवेश्यन्ताम्। पश्यन्तु देवम्' इति। आज्ञानन्तरं च मेघनादेन प्रवेशितान् तान् चिरं अवलोक्य कादम्बरी स्वयमेव अभाषत।

"भद्रमुखाः, परित्यज्यतां अयं शोकावेगः। सुखोदर्कः एष वृत्तान्तः। न केवलं अत्र निरवकाशता शोकस्य, प्रत्युत विस्मयस्य अवसरः। किमत्र परिबोधनेन? अन्यत्र अदृष्टपूर्वः मनुष्येषु

प्रत्यक्षीकृतः एव अयं वृत्तान्तः। भवद्भिरपि दृष्टं च पुरा इव अविकृततनोः देवस्य वदनम्। तत् गम्यतां अधुना वार्तोत्सुकमतेः देवस्य (तारापीडस्य) पादमूलम्। न चायं वृत्तान्तः तस्मै प्रकाशनीयः। 'दृष्टः अस्माभिः, अच्छोदसरसि तिष्ठति' एतदेव आवेदनीयम्। शरीरस्य अविनाशः पुनः प्राणैर्विनाकृतानां प्राणिनाम् दृश्यमानोऽपि अश्रद्धेयः एव। तत् अस्य आवेदनेन सुदूरास्थितमपि गुरुजनं मरणसंशये निक्षिप्य वर्तमाने प्रयोजनमेव नास्ति। प्रत्यागतजीविते जीवितेश्वरे, स्वयमेव अयं अद्भुतः अर्थः गुरुजने जने वा प्रकटीभविष्यति।"

इत्येवं आदिष्टास्तु ते व्यज्ञपयन्। "गत्वापि दयिततनयवार्ताश्रवणलालसस्य राज्ञः, देव्याः, आर्यशुकनासस्य च मुखानि उद्वीक्ष्य निर्विकारवदनानां अस्माकं अवस्थानं अशक्यमेव।" इति विज्ञापिता तैः, 'एवमेतत्' इत्युक्त्वा कादम्बरी मेघनादं अवादीत्। 'मेघनाद, तत् एतदपि भवतु। एभिः सहः अपरः कश्चित् श्रद्धेयवचाः, प्रत्यक्षदृष्टसकलवृत्तान्तः व्रजतु संप्रत्ययाय।' इत्येवमादिष्टस्तु मेघनादो व्यज्ञपयत्। "भृत्यवर्गः सकल एव अयं कन्दमूलफलाशी निश्चयं कृत्वा स्थितः, यथा अस्माकं मध्यात् एकेनापि देवपादाद्विना न प्रतीपं गन्तव्यम् इति।

"भृत्याः अपि ते एव ये संपत्तेः विपत्तौ सविशेषं सेवन्ते। समुन्नम्यमानाः सुतरां अवनमन्ति। स्तूयमानाः न उत्सिच्यन्ते। उच्यमाना न प्रतीपं भाषन्ते। अनादिष्टाः कुर्वन्ति। कृत्वा न जल्पन्ति। विकत्थ्यमानाः अपि लज्जां उद्वहन्ति। महाहवेषु अग्रतः ध्वजभूता इव लक्ष्यन्ते। दानकाले पलायमानाः पृष्ठतो निलीयन्ते। धनात् स्नेहं बहु मन्यन्ते। जीवितात् पुरः मरणं अभिवाञ्छन्ति। तत् सर्वः एव अयं एवं स्थितः भृत्यजनः। देवस्य च स्थाने देवी वर्तते। तत् आज्ञापितं कृतं अवधारयतु

देवी।" इत्युक्त्वा मेघनादः त्वरितकनामानं कुमारबालसेवकं आहूय तैः सह व्यसर्जयत्।

---

२९ पुत्रशोकः

अथ सुबहुदिवसापगमे वार्तया विना उत्ताम्यन्ती चन्द्रापीडस्यैव आगमनाय उपयाचितं कर्तुं अवन्तीनगरीदेवतानां अवन्तिमातॄणां आयतनं निर्गता विलासवती। 'देवि दिष्ट्या वर्धसे, प्रसन्नास्ते अवन्तिमातरः, परागताः युवराजवार्ताहराः' इति ससंभ्रमप्रधावितात् परिजनात् उपश्रुत्य, तस्मिन्नेव मातृगृहाङ्गणे स्थित्वा तेषां आह्वानाय आदिदेश।

अनन्तरं च अतर्कितापतितदर्शनेन उत्पादितद्विगुणदुःखावेगान् निर्जीवितान् इव उपसर्पतः कतिचित् पदानि गत्वा गद्गदस्वरं अकृतप्रणामान् एव सा अवादीत्। 'भद्राः, कथयत आशु वत्सस्य मे वार्तामात्रम्। म्रियते मे वत्सः? दृष्टो वा न भवद्भिः?' इत्येवं पृष्टास्तु ते अवनितलनिवेशितोत्तमाङ्गाः, व्यज्ञपयन्। 'देवि, दृष्टः अस्माभिः अच्छोदसरस्तीरे युवराजः। शेषं एष त्वरितको निवेदयिष्यति।' इत्येवं अभिदधतः एव तान् उद्भाष्पमुखी विलासवती प्रत्युवाच।

"किमपरं अयं तपस्वी निवेदयिष्यति? हा वत्स, चन्द्रापीड, चंद्रानन, चन्द्रशीतलप्रकृते, किं भूतं ते, येन नायातोऽसि? न युक्तं एतत् तव। 'अम्ब न विलम्बं मनागपि करोमि' इति तथा मे पुरः प्रतिज्ञाय क्षणमपि अन्यत्र क्वापि अवस्थातुम्। वत्स, गच्छत एव ते मया अस्य हतहृदयस्य शङ्कया एव ज्ञातं

दुर्लभं मे वत्सस्य पुनर्मुखावलोकनम् इति। को वाऽत्र दोषो वत्सस्य ? मन्दभाग्यायाः मम एव एतानि अपुण्यानां विलसितानि। वत्स, सुदूरस्यापि पादयोः पतामि ते। निवर्तस्व एकवारम्। 'अम्ब' इति आलपतस्ते वदनमालोकयितुं उत्कण्ठितं मे हृदयम्। न श्रद्दधाति मे हृदयं अनिष्टं ते, येन न सहस्रधा स्फुटति। स्फुटीकर्तुं च वार्तां भीता ते त्वरितकोपनीतामेव नेच्छामि। वरं अनाकर्ण्य एव अश्रवणीयं उपरता अस्मि" इति अभिदधाना एव मोहमगात्।

अथ विलासवतीपरिजनेन आवेदिते तस्मिन् वृत्तान्ते, ससंभ्रमं उत्थाय करेणुकां आरुह्य आर्यशुकनासद्वितीयः, अपिबन् इव पुरो राजमार्गम् निर्जगाम नरपतिः। उपेत्य च अवन्तिमातृकागृहं, परिजनेन मलयजजलैः सिञ्चता, कदलीदलैश्च वीजयता, कथंकथमपि चेतनां प्रतिपाद्यमानां विलासवतीमपश्यत्। दृष्ट्वा च समुपविश्य पार्श्वे, शनैः बाष्पगद्गदं अवादीत्। 'देवि, किमर्थं अयं आत्मा वत्सस्य कृते तुच्छतां नीयते ? इयन्ति शुभानि उपात्तानि कर्माणि। न अतोऽधिकस्य सुखस्य भाजनं वयम्। वत्सस्य अङ्कगतस्य मुखं अवलोकितम्। रेणुधूसरशरीरस्य अङ्के लगतः स्पर्शसुखमनुभूतम्। अव्यक्तमनोहारीणि प्रथमजल्पितानि श्रोत्रे कृतानि। गृहीतविद्यस्य गुणवत्तया आनन्दितं हृदयम्। दिग्विजयादागतस्य प्रणमतः परिष्वक्तान्यङ्गानि। एतावदेव मनोरथशतवाञ्छितस्य वस्तुनः न संपन्नं, यद्वधूसमेतस्य निजपदे प्रतिष्ठां कृत्वा तपोवने गन्तव्यम्। **सर्वाभिवाञ्छितप्राप्तिस्तु महतः पुण्यराशेः फलम्**। अपरमपि, किं वृत्तं वत्सस्य, एतत् अद्यापि न परिस्फुटं केनचित् अत्र कथितम्। वत्सस्य मे बालसेवकः त्वरितक आयातः। स वेत्ति सर्वं वृत्तान्तम्। सोऽपि त्वया न पृष्ट एव। तं तु तावत् पृच्छामः'।

इत्यभिधाय त्वरितकमाहूय तं आदिष्टवान्। 'भद्र, कथय किं वृत्तं वत्सस्य। येन अनागमनकारणमपि न किंचित् लिखितवान्' इति। स तु एवं आदिष्टः राज्ञा, गमनतः प्रभृति यथावृत्तं कथयितुमारेभे। राजा तु चन्द्रापीडहृदयस्फुटनवृत्तान्तं आकर्ण्य आर्तस्वरः त्वरितकमवादीत्।

'भद्र विरम, त्वया कथितं संप्रति कथनीयम्। मयापि श्रुतं यच्छ्रोतव्यम्। निवृत्तं श्रवणकौतुकम्। आनन्दितं हृदयम्। हा वत्स, निर्व्यूढा त्वया वैशंपायनस्य उपरि प्रीतिः। देवि, तत् उत्तिष्ठ। यावदेव अतिदूरं न प्रयाति एकाकी वत्सः, तावदेव अनुगमनाय प्रयतावहे। आः शुकनास, किमद्यापि तिष्ठसि? समादिश परिचारकान् चितारचनाय। दापय अशेषं द्विजेभ्यः कोशम्। कस्य कृते अद्यापि प्रतिपाल्यते?' एवं आर्तप्रलापितं तारापीडं त्वरितको व्यज्ञापयत्। 'देव, स्फुटितेऽपि हृदये, ध्रियते शरीरेण युवराजः। शापदोषात् वैशंपायनस्य च यथा जन्म तथा निरवशेषं शृणोतु तावत् देवः' इति।

तारापीडस्तु तद् अद्भुतमाकर्ण्य दत्तावधानः, तेन कथ्यमानं यथादृष्टं, यथाश्रुतं च तत्सर्वमश्रौषीत्। श्रुत्वा च निरतिशयशोककारकं विस्मयास्पदभूतं च युवराजवैशंपायनयोः वृत्तान्तं, दृशं शुकनासमुखे न्यपातयत्। सुहृदस्तु स्वयं दुःखिताः अपि विस्मृत्य आत्मदुःखं सुहृद्दुःखापनोदाय एव यतन्ते, यतः शुकनासः तदवस्थोऽपि स्वस्थवत् अवनिपतिं उवाच।

'देव, विचित्रे अस्मिन् संसारे, कर्मणां शुभाशुभानां विपाकात्, स्थावरजङ्गमस्य न कदाचिदवस्था सा या न संभवति। सर्वेष्वेव पुराणेषु रामायणमहाभारतादिषु च सन्ति अनेकप्रकारकाः शापवार्ताः। तद्यथा। महेन्द्रपदवर्तिनः नहुषस्य राजर्षेः अगस्त्यशापदोषात् अजगरता। त्रिशंकोश्च पितृशापात् चाण्डालभावः।

तिष्ठतु तावदन्यः एव । अयं आदिदेवः भगवान् अजः दशरथस्य आत्मजतां उपगतः, तत् मनुष्येषु देवतानां उत्पत्तिः नैव असंभाविनी । अपि च गर्भारम्भसंभवे देवेन देव्याः वदने विशंश्चन्द्रमाः एव दृष्टः । तथा ममापि स्वप्ने पुण्डरीकस्य एव दर्शनमुपजातम् । तत् उत्पत्तिं प्रति तयोः नास्त्येव संदेहः । विनष्टयोः शरीरस्य अविनाशः कथं, कथं वा पुनर्जीवितप्रतिलम्भः, इत्यत्र अमृतमेव कारणम् आवेदितम् । तच्च चन्द्रमसि वर्तते । तत् च सर्वं एतत् इत्थं एव अवगच्छतु देवः । शापावसाने चन्द्रापीडनाम्नान्तरितस्य चन्द्रमसः दर्शनेन संतापं परित्यक्ष्यन्ति देवः । तत्तयोः अयं शापः अस्माकं पुनः वर एव । तत् अस्मिन् वस्तुनि मनागपि न देवेन देव्या वा शोकः कार्यः । अभिमतदेवताराधनेन कुशलं अभिवर्ध्यताम् ।'

इत्युक्तवति शुकनासे सशोकः एव राजा प्रत्यवादीत् । 'सर्वं एतत्, यत् आर्येण अभिहितं, कोऽन्यो बुध्यते ? केन वा अपरेण वयं परिबोधनीयाः ? किं तु तत् वत्सस्य मे वैशंपायनदुःखात् स्फुटनं हृदयस्य अग्रतः दृष्टिलग्नम् । तदेव पश्यामि । तदेव शृणोमि । तत् गमनात् ऋते अन्यः उपायः नास्ति जीवितसंधारणाय' इत्येवं अवधारयतु आर्यः ।

---

३० सर्वेऽपि प्रतिष्ठन्ते

अथ राजा सह विलासवत्या शुकनासेन च प्रलघुपरिकरः अच्छोदाभिमुखं प्रतस्थे । स तु पिबन्निव पन्थानं एकदिवसेनैव परापतितुं ईहमानः, कियति अध्वनि अद्यापि वर्तामहे, कतिपयैः दिवसैः परापतामः, इति मुहुर्मुहुः त्वरितकं पृच्छन्, अबहुभिरेव दिवसैः आससाद अच्छोदम् ।

तत्र शुकनासावलम्बितशरीरः राजा विवेश आश्रमपदम्। तदनु मनोरमावलम्बितशरीरा प्रविश्य 'क्व मे वत्सः?' इति अवदत् विलासवती। अथ सहजया एव कान्त्या विरहितं सुप्तमिव चन्द्रापीडमालोक्य, 'जात, चिरात् दृष्टोऽसि, देहि मे प्रतिवचनम्, वत्स, केन रोषितोऽसि?। चन्द्रापीड, पादयोः निपत्य प्रणम तावत् अतिदूरमागतस्यापि पितुः पादौ। क्व सा गता ते गुरुजनभक्तिः?' इति कृतार्तप्रलापा, पुनः पुनः कपोलौ चुम्बित्वा चन्द्रापीडस्य, उन्मुक्तकण्ठं अरोदीत्।

तथा रुदतीं तु तारापीडः दोर्भ्यां अवलम्ब्य अब्रवीत्। 'देवि, यद्यपि आवयोः सुकृतैः अपत्यतां उपगतः, तथापि देवतामूर्तिः अयं अशोचनीयः। अस्मिन् शोके कृते न किंचिदपि भवति। केवलं गलः एव स्फुटति रटतः, न हृदयम्। नयनजलमेव पतति, न शरीरम्। अपरं अस्यां अवस्थायां आवाभ्यामपि तावत् मनोरमा शुकनासश्च संधारणीयौ, वयोः लोकान्तरितः वैशंपायनः। तिष्ठतां तावत् एतौ अपि। इयं वधूः ते अस्मदागमनशोकोर्मिमूढा अद्यापि संज्ञां न लभते। तत् एनां तावत् उत्थाप्य अङ्के कृत्वा चेतनां लम्भय। ततो यथेच्छं रोदिष्यसि।'

इति अभिहिता राज्ञा विलासवती 'क्व सा मे वत्सस्य वधूः?' इति अभिदधाना च उपसृत्य 'समाश्वसिहि मातः, त्वया विना अद्य यावत् केन संधारितं वत्सस्य मे चन्द्रापीडस्य शरीरम्? मातः, त्वं अमृतमयीव जातासि, येन वत्सस्य पुनर्वदनमालोकितम्' इति अवादीत्। कादम्बरी तु तेन चन्द्रापीडनामग्रहणेन लब्धसंज्ञा, लज्जावनम्रमुखी, अकरोत् वन्दनां गुरूणाम्। 'आयुष्मति, दीर्घकालं अविधवा भव' इति कृताशीर्वादः राजा मदलेखां आहूय आदिदेश। 'दर्शनसुखं अस्माभिः आसादितम्। किं अस्माभिः अत्र स्थितैर्गतैर्वा? यस्याः करस्य सङ्केन एतत् अवि-

नाशि शरीरं, सैव वधूः पार्श्वेऽस्य तिष्ठतु' इत्यादिश्य निर्जगाम।

निर्गत्य च तरुलतामण्डपे समुपविश्य सकलमेव राजचक्रमाहूय सबहुमानं अवादीत्। 'न मयाद्धिः अवगन्तव्यं यथा अद्य शोकावेशात् एतदहं अङ्गीकरोमि इति। पूर्वचिन्तितः एव अयं अर्थः, यथा वधूसमेतस्य चन्द्रापीडस्य वदनमालोक्य संक्रामितनिजभरेण मया क्वचिदाश्रमपदे गत्वा पश्चिमं वयः क्षपितव्यमिति। स च अयं मे अर्थः पुराकृतैः कर्मभिः विरूपैः एवं समुपनमितः। **अनतिक्रमणीया नियतिः**। अप्रापणीयं वत्सस्य सुखम्। प्रजापरिपालनफलं तु पुनः भवद्भुजेषु अविरहितं अस्त्येव। तत् इच्छामि चिरकाङ्क्षितम् मनोरथं पूरयितुम्। धन्याश्च ते ये जरापीतसारतनवः तनयेषु आत्मभरं आसज्य लघुशरीराः परलोकगमनं साधयन्ति।'

इत्युक्त्वा संनिहितान्यपि परित्यज्य सर्वसुखानि, अङ्गीकृत्य वन्यानि तपोवनदुःखानि, तथा हि हर्म्यवुद्धिं वृक्षमूलेषु, अन्तःपुरप्रीतिं लतासु, संस्तुतजनस्नेहं हरिणकेषु, निवसनरुचिं चीरवल्कलेषु, आहारहार्दं कन्दमूलफलेषु, नर्मालापं धर्मसंकथासु, शस्त्रधारणव्यसनं अक्षसूत्रे, कोशस्पृहां तपसि, आज्ञां मौने, तनयस्नेहं तरुषु संक्रमय्य तपस्विजनोचिताः क्रियाः कुर्वन्, सायं प्रातश्च अनुभूतचन्द्रापीडदर्शनसुखः, नरपतिः सपरिवारः, समं देव्या, शुकनासेन च तत्रैव अतिष्ठत्।

तृतीयो विभागः

३१ शुकशावकः

अस्ति पूर्वापरजलनिधिवेलावनलग्ना, मध्यदेशालंकारभूता मेखलेव भुवः, पादपैः उपशोभिता, विराजिता लतामण्डपैः, क्रूरसत्त्वापि मुनिजनसेविता पवित्रा विन्ध्याटवी नाम अरण्यानी। तस्यां च एकदेशे दण्डकारण्ये, उत्पत्तिक्षेत्रमिव धर्मस्य, पीतसकलसागरजलस्य भगवतो महामुनेः अगस्त्यस्य आश्रमपदं आसीत्। यत्र च दशरथवचनं अनुपालयन्, उत्सृष्टराज्यः, रामो लक्ष्मणेन सीतया च सह पञ्चवट्यां कंचित् कालं सुखं उवास।

आसीत् तस्य च एवंविधस्य अगस्त्याश्रमस्य नातिदूरे, अगाधं अप्रतिमं पम्पाभिधानं सरः। यदूपेण किल जलनिधिपानप्रकुपितवरुणप्रोत्साहितेन अगस्त्यमत्सरात् तदाश्रमसमीपे अपरः इव वेधसा जलनिधिः उत्पादितः। तस्यैव पद्मसरसः पश्चिमे तीरे अधिपतिरिव दण्डकारण्यस्य, नायकः इव सर्ववनस्पतीनां, सखा इव विन्ध्यस्य महान् जीर्णः शाल्मलीवृक्षः।

तत्र च शाखाग्रेषु कोटरोदरेषु विरचितकुलायसहस्राणि नानादेशसमागतानि शुकशकुनिकुलानि प्रतिवसन्ति स्म। ते च शुकादयः तस्मिन् वनस्पतौ अतिवाह्य रजनीं आत्मनो नीडेषु, प्रतिदिनं उत्थायोत्थाय आहारान्वेषणाय नभसि विचरन्ति स्म। कृताहाराश्च पुनः प्रतिनिवृत्य, शावकेभ्यो विविधफलरसान् चञ्चुपुटेन दत्त्वा, क्षपाः क्षपयन्ति स्म।

एकस्मिन् जीर्णकोटरे जायया सह निवसतः पश्चिमे वयसि वर्तमानस्य कस्यचित् शुकस्य एकः विधिवशात् सूनुः अभवत्। तत्पत्नी तु प्रसववेदनया लोकान्तरं अगमत्। जायाविनाशशोक-

दुःखितोऽपि शुकः एकाकी सुतसंवर्धनपरोऽभूत्। अतिपरिणतवयाश्च चञ्चुपुटेन परनीडनिपतितान् तण्डुलकणान् आदाय, तरुमूलनिपतितानि फलशकलानि च समाहृत्य परिभ्रमितुं अशक्तः तस्मै आहारमददात्। प्रतिदिवसं स्वयम् च तदुपभुक्तशेषं अकरोत् अशनम्।

एकदा तु प्रत्यूषसि सहसा एव तस्मिन् महावने मृगयाकोलाहलध्वनिः उदचरत्। 'इतो मृगकदम्बकं, इतो वनगजकुलं, इतो वनवराहयूथं, विमुच्यन्तां श्वानः' इति अन्योन्यं अभिवदतः मृगयासक्तस्य महतो जनसमूहस्य कोलाहलं आकर्ण्य स्वनीडावस्थितः स शुकशावकः भयविह्वलः जातवेपथुः, समीपवर्तिनः पितुः पक्षपुटान्तरं अविशत्।

अचिराच्च प्रशान्ते तस्मिन् मृगयाकलकले, स कोटरस्थः एव शिरोधरां प्रसार्य 'किम् इदम्?' इति समुपजातविस्मयः, दिदृक्षुः, तामेव दिशं चक्षुः प्राहिणोत्। अभिमुखं आपतितं च शबरसैन्यमद्राक्षीत्। मध्ये च तस्य, प्रथमे वयसि वर्तमानं, अतिकर्कशत्वात् आयसं इव, सहोदरं इव पापस्य, शबरसेनापतिं अपश्यत्। मातङ्गकः इति तस्य अभिधानं तु पश्चात् सः अश्रौषीत्।

स सेनापतिः कैश्चित् केसरिकृत्तिधारिभिः, कैश्चित् मयूरपिच्छधारिभिः, कैश्चित् गृहीतपिशितभारैः, कैश्चित् विधृतगजदन्तैः, शबरवृन्दैः परिवृतः आसीत्।

आसीच्च शुकशावकस्य मनसि। 'अहो साधुजनगर्हितं चरितं एतेषाम्! पुरुषपिशितोपहारे धर्मबुद्धिः, आहारः साधुजनगर्हितः मधुमांसादिः, प्रज्ञा शकुनिज्ञानम्, परिचिताः श्वानः, मित्राणि धनूंषि, सहायाः सायकाः, चौर्येण जीवनं' इति चिन्तयत्येव तस्मिन्, शबरसेनापतिः श्रमं अपनिनीषुः तस्यैव शाल्म-

लीतरोः अधः छायायां पल्लवासने समुपाविशत्। आपीतसलिलश्च अपगतश्रमः, उत्थाय शबरसैन्येन अनुगम्यमानः, शनैः शनैः अभिमतं दिगन्तरं अयासीत्।

एकतमस्तु जरन् शवरः, पिशितार्थी तस्मिन्नेव तरुमूले मुहूर्तमिव व्यलम्बत। स भीषणया दृष्ट्या गणयन्निव शुककुलकुलायस्थानानि, आरुरुक्षुः तं वनस्पतिं आ मूलात् अपश्यत्। **किमिव हि दुष्करं अकरुणानाम्?** यतः सः तं सोपानैः इव अयत्नेनैव पादपं अधिरुह्य, फलानीव तस्य वनस्पतेः, कोटरान्तरेभ्यः शुकशावकान् अग्रहीत्, अपगतासूंश्च कृत्वा, क्षितौ अपातयत्। मुहुर्मुहुः दत्तचञ्चुप्रहारं उत्कूजन्तं तं शुकशावकस्य तातमपि अपगतासुं अकरोत्। परं तस्य तत्पक्षपुटान्तरगतं शावकं नालक्षयत्।

स शावकः उपरतेन तातेन सह शुष्कपर्णराशेः उपरि आत्मानं निपतितं अपश्यत्। आयुषः अवशिष्टतया तु अङ्गानि तस्य न अवाशीर्यन्त! यावच्च असौ तस्मात् तरुशिखरात् न अवतरति, तावत् स शिशुः पितरं उपरतं उत्सृज्य, भयेनैव लुठन् इतस्ततः नातिदूरवर्तिनः तमालविटपिनः मूलदेशमविशत्। अवतीर्य च तेन समयेन क्षितितलविप्रकीर्णान् संहृत्य तान् शुकशिशून् अतित्वरितगमनः सेनापतिगतेन एव वर्त्मना तामेव दिशं अन्वगच्छत्।

अथ स शुकशिशुः पिपासया बाध्यमानः तस्मात् तमालतरुमूलात् सलिलसमीपं उपसर्तुं प्रयत्नं अकरोत्। मुहुर्मुहुः मुखेन पततः तस्य अभूत् मनसि। **'अतिकष्टासु दशासु अपि जीवितनिरपेक्षाः न भवन्ति खलु जगति प्राणिनां वृत्तयः। नास्ति जीवितात् अन्यत् अभिमततरं इह जगति जन्तूनाम।** एवं उपरते अपि तातें, यद् अहं अविकलेन्द्रियः पुनः एव प्राणिमि। धिङ् मां अकरुणं, अतिनिष्ठुरं

अकृतज्ञम्। खलं हि खलु मे हृदयम्। मया हि परिणतवयसापि तातेन संवर्धनक्लेशं महान्तमपि अगणयता यत् परिपालितः तत् सर्वं एकपदे विस्मृतम्। मन्ये निर्घृणता एव केवलं इयं मम सलिलपानबुद्धिः। अद्यापि दूरत एव सरस्तीरम्। सीदति पुनः मे हृदयम्। अन्धकारतां पयाति चक्षुः। अपि नाम खलो विधिः अनिच्छतः अपि मे मरणं अद्यैव उपपादयेत्!'

---

३२ जाबालेराश्रमः


तस्मात् सरसः नातिदूरवर्तिनि तपोवने जाबालिर्नाम महातपा मुनिः प्रतिवसति स्म। तत्तनयश्च हारीतनामा मुनिकुमारकः, जटानां निकरेण उपेतः, कमण्डलुना अध्यासितवामकरतलः, यज्ञोपवीतेन उद्भासमानः, सवयोभिः अपरैः तपोधनकुमारकैः अनुगम्यमानः; तदेव सरः स्निग्धासुः उपागमत्।

प्रायेण अकारणमित्राणि अतिकरुणार्द्राणि सदा खलु भवन्ति सतां चेतांसि। यतो हारीतः तदवस्थं आलोक्य तं शुकशिशुं समुपजातकरुणः, समीपवर्तिनं ऋषिकुमारकं अन्यतमं अब्रवीत्। 'अयं कथमपि शुकशिशुः असंजातपक्षपुटः एव तरुशिखरात् अस्मात् परिच्युतः। श्येनमुखपरिभ्रष्टेन वा अनेन भवितव्यम्। तथा हि अस्य अल्पशेषं जीवितम्। न शक्नोति शिरोधरां धारयितुम्। तद् एहि, यावदेव अयं असुभिः न विमुच्यते, तावदेव गृहाण एनं, अवतारय सलिलसमीपम्।' इत्यभिधाय तेन तं सरस्तीरं अनाययत्। उपसृत्य च जलसमीपं एकदेशनिहितदण्डकमण्डलुः स्वयं तं अंगुल्या कति-

चित् सलिलबिन्दून् अपाययत्। उपजातनवीनप्राणं च तं छायायां निधाय समुचितं अकरोत् स्नानविधिम्। अभिषेकावसाने भगवते सावित्रे दत्त्वा अर्घ्यं उदतिष्ठत्। आगृहीतधवलवल्कलश्च कमण्डलुं आपूर्य, सकलेन तेन मुनिकुमारकदम्बकेन अनुगम्यमानः, तं शुकशिशुं गृहीत्वा तपोवनाभिमुखं शनैःशनैः अगच्छत्। अनातिदूरं इव गत्वा स शुकशिशुः मुक्तकुसुमैः अभ्यर्च्यमानं इव पादपैः, सततविभूतहव्यधूमगन्धं, पठ्यमानविविधपुस्तकं, विचार्यमाणसकलशास्त्रार्थं, अतिरमणीयं आश्रमं अपश्यत्। यत्र च मलिनता हविर्धूमेषु, न चरितेषु; तीक्ष्णता कुशाग्रेषु, न स्वभावेषु; चञ्चलता कदलीदलेषु, न मनःसु। तस्य च एवंविधस्य आश्रमस्य मध्यभागमण्डलं अलंकुर्वाणस्य अशोकतरोः अधः छायायां उपविष्टं, स्थैर्येण अचलानां, गांभीर्येण सागराणां, तेजसा सवितुः, निर्मलतया अंबरतलस्य संविभागमिव कुर्वाणं, भगवन्तं जाबालिमपश्यत्।

अवलोक्य च सोऽचिन्तयत्–'अहो प्रभावस्तपसाम्! **पुण्यानि हि नामग्रहणान्यपि महामुनीनाम्, किं पुनर्दर्शनानि?** धन्यं इदं आश्रमपदं अयं अधिपतिर्यत्र। सर्वतेजस्विनां अयं अग्रणीः। एषः प्रवाहः करुणारसस्य, सागरः संतोषामृतरसस्य, दिवसकरो मोहान्धकारस्य, दर्शकः सत्पथानाम्, सखा सत्यस्य। अहो प्रभावो महात्मनाम्! अत्र हि शाश्वतिकं अपहाय विरोधं, तिर्यञ्चोऽपि तपोवनवसतिसुखं अनुभवन्ति।'

एवं चिन्तयन्तं एव तं तस्यां एव अशोकतरोः छायायां एकदेशे स्थापयित्वा हारीतः कृताभिवादनः पितुः, समीपवर्तिनि कुशासने समुपाविशत्। आलोक्य तु शुकशिशुं सर्वे एव मुनयः 'कुतः अयं आसादितः शुकशिशुः?' इति तं आसीनमपृच्छन्। असौ तु तान् अब्रवीत् 'अयं मया स्नातुं इतोगतेन सरस्तीरत-





जाबालिः— श्रूयतां शुककथा, यदि कुतूहलम् ।

रुनीडनिपतितः जातदयेन आनीतः । तत् यावत् अयं अक्षमः अंतरिक्षं उत्पतितुं, तावत् अत्रैव कस्मिंश्चित् आश्रमतरुकोटरे धारयतु जीवितम् । अनाथपरिपालनं हि धर्मः अस्माद्विधानाम् । इत्येवमादिकं शुकसंबद्धं आलापं आकर्ण्य, किंचिदुपजातकुतूहलः, भगवान् जाबालिः, तं पुनःपुनः विलोक्य 'स्वस्य एव अविनयस्य फलं अनेन अनुभूयते' इत्यवोचत् । स हि भगवान् जाबालिः कालत्रयदर्शी । तपःप्रभावात् दिव्येन चक्षुषा सर्वमेव करतलगतमिव जगत् अवलोकयति स्म । अवादीत् जन्मान्तराणि अतीतानि। अकथयच्च आगामिनमपि अर्थम् ।

अथ सर्वा एव सा तापसपरिषद् तद् जाबालिवचनम् श्रुत्वा 'कीदृशः अनेन अविनयः कृतः ? क्व वा कृतः ? जन्मान्तरे वा कोऽयं आसीत् ?' इति कुतूहलिनी अभवत् । असकृत् उपयाचितवती च तं भगवन्तम् । 'आवेदय, प्रसीद भगवन्, विहगजातौ कथमस्य संभवः ? किमभिधानो वा अयम् ? अपनयतु भगवान् नः कुतूहलम्' इति–

एवं उक्तः स महामुनिः तान् सर्वान् एकाग्रान् श्रवणपरान् मुनीन् बुद्ध्वा शनैः अब्रवीत् 'श्रूयतां यदि कुतूहलम्—

अयं श्वेतकेतुपुत्रः पुण्डरीकः । असौ स्वयंकृतात् एव अविनयात् चन्द्रस्य शापात् दिव्यलोकतः परिभ्रश्य मर्त्यलोके उज्जयिन्यां वैशंपायननामा शुकनाससूनुः अभवत् । स एव एषः पुनः स्वयंकृतेन अविनयेन कोपितस्य पितुः शुकनासस्य आक्रोशात्, महाश्वेताकृताच्च शापात् अस्यां शुकजातौ पतितः।' इत्येवं विस्तरशः वदत्येव मगवति जाबालौ, बाल्येऽपि तस्य शुकशिशोः सुप्तप्रबुद्धस्य इव पूर्वजन्मान्तरोपात्ताः समस्ताः एव विद्याः जिह्वाग्रे अभवन् । मनुजस्य इव भारती संवृत्ता । सर्ववस्तुविषयं स्मरणं च संवृत्तम् । किं बहुना ? मनुष्यशरीरात् ऋते सर्वं अन्यत्

तत्क्षणमेव संवृत्तम् । स एव चंद्रापीडस्य उपरि स्नेहः । स एव महाश्वेतायां अनुरागः । तथा च आविर्भूतसकलान्यजन्मवृत्तान्तः समुत्सुकान्तरात्मा, किं वृत्तम् मातापित्रोः, किं तातस्य तारापीडस्य, किं अम्बायाः विलासवत्याः, किं वयस्यस्य चन्द्रापीडस्य, उत प्रथमसुहृदः कपिञ्जलस्य, आहोस्वित् महाश्वेतायाः इति नाज्ञासीत् । तथा च निजाविनयश्रवणलज्जया विशन्निव पातालं कथमपि शनैः शनैः व्यज्ञापयत् ।

'भगवन्, त्वत्प्रसादात् आविर्भूतज्ञानोऽस्मि संवृत्तः । स्मृताः खलु मया सर्वे एव पूर्वबान्धवाः । मूढतायां च यथैव तेषां स्मरणं नासीत्, तथैव न विरहपीडापि । अधुना पुनः तान् स्मृत्वा स्फुटति इव मे हृदयम् । तत् चंद्रापीडस्य जन्माख्यानेन प्रसादं करोतु भगवान्, येन अयं तिर्यग्योनिनिवासोऽपि मे तेन सह एकत्र वसतः न पीडाकरः सञ्जायते' इति ।

एवं च विज्ञापितो भगवान् जाबालिः सस्नेहकोपगर्भं प्रत्यवादीत्– 'दुरात्मन्, यया एतावतीं दशां उपनीतोऽसि कथं तामेव तरलहृदयतां अनुबध्नासि ? । अद्यापि पक्षावपि न उद्भिद्येते । तत् संचरणक्षमस्तु तावत् भव । ततो मां प्रक्ष्यसि ।'

इत्येवमुक्ते भगवता समुपजातकुतूहलः हारीतः पप्रच्छ— 'तात, महानयं विस्मयो मे । कथय कथं अस्य दिव्यलोकसंभूतस्य स्वल्पं आयुः संवृत्तम् ?' इत्येवं पृष्टः सूनुना भगवान् जाबालिः प्रत्यवादीत्– 'स्पष्टमेवात्र कारणम् । लोके च प्रायः कारणगुणभाञ्जि एव कार्याणि दृश्यन्ते । मरणं च अस्य इंद्रियनिग्रहाभावात् अविनयात् च उपनतम् । अधुना शुकजातौ अपि तादृशः एव अल्पायुः अयम् । शापावसानोत्तरकालं अस्य अक्षयेण आयुषा योगो भविष्यति' इति ।

एतत् श्रुत्वा स शुकशिशुः पुनः अवनितलनिवेशितशिराः

भगवन्तं व्यज्ञापयत्। 'भगवन् अहं अपुण्यवान् अस्यां तिर्यग्योनौ सर्वस्य एव कार्यस्य अक्षमः। वागपि मे भगवतः प्रसादात् संप्रत्येव आनने संभूता। शरीरं पुनः केन कारणेन अक्षयं भविष्यति तन्मे आज्ञापयतु भगवान्।' इत्येवं विज्ञापितस्तु भगवान् जाबालिः आज्ञापितवान् 'एतदपि यथा वर्तते तथा ज्ञास्यसि एव। आस्तां तावत् इयं कथा। रसाक्षेपात् अचेतिता एव अस्माभिः प्रभातप्राया रजनी।'

इत्यभिधाय उत्थिते भगवति जाबालौ, समस्ता एव सा तपस्विपरिषद् विस्मयोत्फुल्लमुखी यथास्थानं जगाम।

---

३३ शुक-कपिञ्जलौ

हारीतस्तु तं शुकशिशुं निजकरेण एव उत्क्षिप्य, आत्मपर्णशालां नीत्वा शनैः वेदिदेशे स्थापयित्वा प्राभातिकक्रियाकरणाय निर्ययौ। निर्गते च तस्मिन् स शुकः तिर्यग्जातिपतनेन पीडितान्तरात्मा चिन्तां प्राविशत्। 'अत्र तावत् अनेकभवसुकृताधिगम्यं मानुष्यमेव दुर्लभम्। तत्रापि अपरं, सकलजातिविशिष्टं ब्राह्मण्यम्। ततोऽपि मुनित्वम्। तस्यापि दिव्यलोकनिवासित्वम्। तत् येन एतावतः स्थानात् स्वदोषैः आत्मा पातितः, सः कथं अधुना तिर्यग्जातेः समुद्धृतः स्यात्? निष्प्रयोजनेन अमुना जीवितेन किं मे परिरक्षितेन? पततु यत्र तत्र क्वापि इदं शरीरम्। परित्यजामि एतत्।'

इत्येवं जीवितपरित्यागचिन्तानिर्मीलितं तं समुच्छ्वासयन् इव विकासहासिना मुखेन सहसा प्रविश्य हारीतः अभ्यधात्। 'भ्रातर् वैशंपायन, दिष्ट्या वर्धसे। पितुस्ते भगवतः श्वेतकेतोः पाद-

मूलात् कपिञ्जलः त्वामेव अन्विष्यन् आयातः' इति। शुकस्तु तच्छ्रुत्वा तत्क्षणेन उत्पन्नपक्षः इव उत्पत्य, तत्ससीपं एव प्राप्तुं अभिवाञ्छन्, 'क्वासौ?' इति तं अप्राक्षीत्। एवं वदन्नेव अग्रतः कपिञ्जलं अद्राक्षीत्। कपिञ्जलस्तु तं करद्वयेन उत्क्षिप्य, वक्षसि निवेश्य, चिरं आलिंगनसुखं किल अनुभूय इतरवत् अरोदीत्। तथा रुदन्तं तु तं शुकोऽवदत्। 'सखे कपिञ्जल, मम पापात्मनः इदं (रुदनं) युज्यते, यत् त्वया प्रारब्धम्। त्वं पुनः बालोऽपि न स्पृष्टः एव अमीभिः रागादिभिः। तत्किमनेन मूढजनगतेन वर्त्मना? समुपविश्य कथय। अपि कुशलं तातस्य? स्मरति वा माम्? दुःखितो वा मदीयेन दुःखेन? मद्वृत्तान्तं आकर्ण्य किं उक्तवान्? कुपितो न वा?' इति।

स तु एवं उक्तः पल्लवासने समुपविश्य आख्यातवान्। "सखे, कुशलं तातस्य। अयं च अस्मद्वृत्तान्तः प्रथमतरं एव तातेन दिव्येन चक्षुषा दृष्टः। दृष्ट्वा च प्रतिक्रियायै कर्म प्रारब्धम्। समारब्धे एव कर्मणि, तुरगभावात् विमुक्तः, गतोऽस्मि तातस्य पादमूलम्। आलोक्य मां आहूय आज्ञापितवान्। 'वत्स कपिञ्जल, महामुनेः जाबालेः आश्रमपदं सुहृत् ते प्राप्तः। जन्मान्तरस्मरणं च अस्य उपजातम्। तद्गच्छ संप्रति तं द्रष्टुम। मदीयया च आशिषा अनुगृह्य वक्तव्यः असौ। 'वत्स, यावदिदं कर्म परिसमाप्यते, तावत् त्वया अस्मिन्नेव जाबालेः आश्रमे स्थातव्यम्' इति। त्वद्दुःखदुःखितया अम्बया श्रियापि एतदेव पुनःपुनः समादिष्टम्' इति।

ततः शुकः तं अब्रवीत्। 'सखे कपिञ्जल, त्वया मन्दपुण्यस्य मम कृते तुरगतां आपन्नेन बहुतराण्येव दुःखानि अनुभूतानि। कथं सोमपानोचितेन अमुना आस्येन खरखलीनक्षतयो विसोढाः? कथं एतु कुसुमोच्चयस्पर्शमात्रक्षमेषु कशाभिघाताः निप-

तिताः' इति। एभिः अन्यैश्च पूर्ववृत्तान्तालापैः, तत्कालविस्मृततिर्यग्जातिदुःखः सुखमतिष्ठत्।

उपरोहति च मध्याह्नं सवितरि, हारीतः सह कपिञ्जलेन शुकं यथोचितमाहारमकारयत्। कृताहारश्च कपिञ्जलः क्षणमिव स्थित्वा शुकमब्रवीत् "सखे, अहं हि तातेन त्वां समाश्वासयितुं, 'जाबालिपादमूलात् आ कर्मपरिसमाप्तेः न त्वया चलितव्यम्' इत्येतत् च आदेष्टुं विसर्जितः। अन्यत् अहमपि तत्रैव कर्मणि व्यग्रतरः एव। तत् व्रजामि संप्रति इति।" शुकस्तु तत् श्रुत्वा विषण्णवदनः तं प्रत्यवदत्। 'सखे कपिञ्जल, एवं गते किं ब्रवीमि? किं च तातस्य अम्बायाः वा संदिशामि? सर्वं त्वमेव वेत्सि' इति। स तु एवम् उक्तः अंतरिक्षम् अतिक्रम्य क्वापि अदर्शनम् अगात्।

३४ चाण्डालकन्यका

अथ हारीतेन संवर्ध्यमानः शुकः कतिपयैः एव दिवसैः संजातपक्षः अभवत्। उत्पन्नोत्पतनसामर्थ्यश्च चेतसि अकरोत्। 'गमनक्षमस्तु संवृत्तोऽस्मि। तन्न नाम चन्द्रापीडोत्पत्तिपरिज्ञानम्। महाश्वेता पुनः सा एव आस्ते। भवतु तत्रैव गत्वा तिष्ठामि।' इति निश्चित्य प्रातर् विहारनिर्गतः एव उत्तरां ककुभं गृहीत्वा अवहत्। अबहुदिवसाभ्यस्तगमनतया अवाशीर्यन्त इव तस्य अङ्गानि श्रमेण। अशुष्यत् चञ्चुपुटं पिपासया। तदवस्थश्च सरस्तीरम् अवतीर्य, आतृप्तेः पयो निपीय, यथाप्राप्तैः फलैश्च कृत्वा क्षुधः

प्रतीकारं, तीरतरुशाखाम् आरुह्य अतिष्ठत्। तथा स्थितश्च अध्व-श्रमसुलभां निद्रामगच्छत्।

चिरादिव च लब्धप्रबोधः बद्धमात्मानं तन्तुपाशैः अपश्यत्। अग्रतश्च वर्णे चरिते च कृष्णम्, आशये केशेषु च अस्निग्धम्, निवसने कर्मणि च मलिनं पुरुषमद्राक्षीत्। आलोक्य च तं आत्मनः उपरि निष्प्रत्याशः एव अपृच्छत्। 'भद्र, कस्त्वम्? किमर्थं वा त्वया बद्धोऽस्मि? यदि आमिषतृष्णया, तत् किमिति सुप्तः एव न व्यापादितोऽस्मि? अथ कौतुकात्, ततः कृतं कौतु-कम्। मुञ्चतु माम् इदानीं भद्रमुखः। मया खलु वल्लभजनदर्श-नोत्कण्ठितेन दूरं गन्तव्यम्।'

एवमुक्तः स पुरुषः तं प्रत्यवादीत्। "महात्मन्, अहं खलु क्रूरकर्मा जात्या च चाण्डालः। न च मया त्वम् आमिष-लुब्धेन कुतूहलिना वा बद्धः। मम खलु स्वामी पक्कणाधिपतिः नातिदूरे कृतावस्थानः। तस्य दुहिता कौतुकमये प्रथमे वयसि वर्तते। तस्याः त्वं केनापि दुरात्मना कथितः, यथा किल 'जाबालेः आश्रमे एवंगुणविशिष्टः शुकः तिष्ठति' इति। तया च श्रुत्वा उत्पन्नकौतुकया, त्वद्ग्रहणाय बहवः एव अपरे मादृशाः समा-दिष्टाः। तत् अद्य पुण्यैर्मया आसादितोऽसि। त्वामहं तत्पाद-मूलं नयामि। बन्धे मोक्षे च अधुना सा ते प्रभवति" इति।

शुकस्तु तत् श्रुत्वा अशनिना इव ताडितः शिरसि, चेतसि अकरोत्। "अहो, मे मन्दभाग्यस्य दारुणतरः कर्मणां विपाकः येन मया श्रियः जातेन, महामुनेः श्वेतकेतोः स्वहस्तसंवर्धितेन दिव्यलोकाश्रमनिवासिना भूत्वा अधुना पक्कणं प्रवेष्टव्यम्। चाण्डालैः सह एकत्र स्थातव्यम्। मातङ्गाङ्गनाकरोपनीतैः कवलैः आत्मा पोषणीयः। चण्डालबालकजनस्य क्रीडनीयेन भवित-व्यम्। दुरात्मन्, पुण्डरीकहतक, धिक् जन्मलाभं ते। मातः,

रक्ष माम् अस्मात् महानरकपातात्। तात, त्रायस्व कुलतन्तुमेकम्। त्वया एव संवर्धितोऽस्मि। वयस्य कपिञ्जल, यदि परापत्य त्वया अस्मात् पापात् न मोचितोऽस्मि, तदा जन्मान्तरे अपि पुनर्मा कृथाः मत्समागमप्रत्याशाम्।" इत्येतानि च अन्यानि च चेतसा विलप्य तं पुनः अवदत्।

"भद्रमुख, जातिस्मरो मुनिरस्मि जात्या। तत् तवापि माम् अस्मात् संकटात् उद्धृत्य धर्मो भवेत्। केनचित् अपरेण अदृष्टस्य मन्मुक्तिकृतः तव प्रत्यवायो नास्त्येव। तत् मुञ्चतु मां भद्रमुखः" इति।

स पुरुषः तु विहस्य तमब्रवीत् 'रे मोहान्ध, यस्य तव एव आत्मशरीरस्थाः शुभाशुभकर्मसाक्षिभूताः पञ्च लोकपालाः न पश्यन्ति सः अन्यस्य भयात् अकार्यं नाचरति। तत् नीतः असि मया स्वाम्याज्ञया' इति। एवम् अभिदधानः एव शुकम् आदाय पक्कणाभिमुखमगमत्।

शुकस्तु तेन तद्वचसा मूकतामापन्नः 'केषां पुनः कर्मणाम् इदं मे फलम्!' इति अन्तरात्मना अभिध्यायन् प्राणपरित्यागं प्रति कृतनिश्चयोऽभवत्। नीयमानश्च तथा अग्रतः दत्तदृष्टिः, आकरमिव सर्वनरकाणां, पत्तनमिव सर्वपापानां, स्मर्यमाणमपि भयंकरं, श्रूयमाणमपि उद्वेगकरं, दृश्यमानमपि पापजननं, मांसमेदोवसासृक्कर्दमप्रायं पक्कणमपश्यत्। दृष्ट्वा च तं तादृशं, समुत्पन्नघृणः अन्तरात्मनि अकरोत्। "अपि नाम सा चाण्डालदारिका दूरतः एव माम् आलोक्य उत्पन्नकरुणा मोचयेत्? न जातिसदृशम् आचरिष्यति? भविष्यन्ति एवंविधानि मे पुण्यानि?" इत्येवं कृताशंसम् एव तं नीत्वा स चण्डालः 'एष स मया प्राप्तः' इति तस्यै चण्डालदारिकायै दर्शितवान्।

सा तु प्रहृष्टतरवदना, 'शोभनं कृतम्' इति तम् अभिधाय तत्करात् स्वकरयुगेन आदाय शुकम् 'आः पुत्रक, प्राप्तोऽसि। सांप्रतं क्व अपरं गम्यते? व्यपनयामि ते सर्वमिदं कामचारित्वम्' इति अभिदधाना एव दारुपञ्जरे आक्षिप्य अर्गलितद्वारा सा तं शुकमवदत् यथा 'अत्र निर्वृतः संप्रति तिष्ठ'। इत्यभिधाय तूष्णीमस्थात्।

शुकस्तु तथा पञ्जरे संरुद्धः चेतसि अकरोत्। 'महासंकटे पतितोऽस्मि। यदि तावत् आवेदितात्मावस्थः, मुक्तये विज्ञापयामि, तदा यः एव मे गुणः दोषताम् आपद्यत, बन्धनाय उपजातः, स एव संवर्धितः भवति। नाहम् अस्याः तनयः, न भ्राता, न च बन्धुः। अथ मौनम् आलम्ब्य तिष्ठामि, गृहीतमौनं कदाचित् निर्वेदात् मुञ्चत्येव। वदंस्तु पुनः न मोक्तव्यः एव अहम् अनया। अपि च यत् दिव्यलोकतो भ्रंशः, यत् मर्त्यलोके जन्म, यत् तिर्यग्योनौ पतनं, यच्च इदम् एवंविधं पञ्जरबन्धदुःखं, सर्वः एव अयम् अनियतेन्द्रियत्वस्य एव दोषः। तत् किम् एकया वाचा? सर्वेन्द्रियाण्येव नियमयामि।' इति निश्चित्य मौनग्रहणमकरोत्। आलप्यमानः अपि, आतर्ज्यमानः अपि, आहन्यमानः अपि, तुद्यमानः अपि च बलात्, न किञ्चिदपि अवदत्। केवलम् उच्चैः चीत्कारमेव अमुञ्चत्। उपनीतेऽपि च पानाशने, तं दिवसं अनशनेनैव अत्यवाहयत्।

अपरेद्युश्च सा चाण्डालकन्यका स्वपाणिना उपनीय नानाविधानि अपक्वानि पक्वानि च फलानि, स्निह्यन्तीव तमवोचत्। "क्षुत्पिपासार्दितानां हि पशुपक्षिणां न भोज्याभोज्यविवेकः। तत् यदि एवंविधः त्वं कोऽपि पूर्वजातिस्मरः अस्मदीयमाहारं परिहरसि, तथापि तिर्यग्जातौ वर्तमानस्य ते, किं वा अभक्ष्यं यन्न भक्षयासि? येन उत्कृष्टतमां जातिं प्राप्य, आत्मना एव ईदृशं कर्म

कृतं, येन तिर्यग्योनौ पतितः, स त्वं किम् अपरं विचारयसि ? प्रथमम् एव आत्मा न विवेके स्थापितः। अधुना स्वकर्मोपात्तजातिसदृशम् आचरतः ते नास्त्येव दोषः। येषां च भक्ष्याभक्ष्यनियमः अस्ति, तेषामपि आपत्काले प्राणानां संधारणम् अभक्ष्योपयोगेनापि तावद् विहितम्। किं पुनः त्वादृशस्य ? फलानि तु चाण्डालहस्तादपि प्रतिगृह्यन्ते एव। तत् किमर्थं न भक्षयसि अमूनि मुनिजनोचितानि वनफलानि ?" इति।

शुकस्तु तेन तस्याः चाण्डालजात्यनुचितेन वचसा विवेकेन च विस्मितान्तरात्मा, तथा इति प्रतिपद्य, जीविततृष्णया क्षुत्पिपासोपशमाय अशनक्रियामङ्गीकृतवान् आसीत्। मौनं तु पुनर्नात्याक्षीत्।

एवमतिक्रामति काले स शुकः एकदा प्रभातायां यामिन्याम् अद्राक्षीत् कनकपञ्जरे स्थितम् आत्मानम्। सकलमेव तत् पक्षणम् अमरपुरसदृशम् आलोक्य च विस्मितान्तरात्मा, 'किमेतत् ?' इति कुतूहलात् प्रष्टुकामो यावत् न अत्यजत् मौनं, तावत् सा चाण्डालकन्यका शुकमादाय मालवदेशाधिपतेः पादमूलं गता।

---

३५ राजा शूद्रकः

आसीत् पाकशासन इव अपरः, भुवो भर्ता चक्रवर्तिलक्षणोपेतः, आश्रयो रसिकानां, धौरेयः साहसिकानां, राजा शूद्रको नाम। तस्य वेत्रवत्या सरिता परिगता विदिशाभिधाना पुरी राजधानी आसीत्। यस्मिंश्च राजनि पालयति महीं, चित्रकर्मसु वर्णसंकराः, शास्त्रेषु चिन्ता, शशिकृपाणकवचेषु कलङ्काः, प्रजानामासन्।

यस्य च विवाहेषु करग्रहणम्, अनवरतमखाग्निधूमेन अश्रुपातः, तुरङ्गेषु च कशाभिघातः अभूत्।

असौ शूद्रकः प्रथमे वयसि वर्तमानः, कदाचित् मृगयाव्यापारेण, कदाचित् शास्त्रालापेन, कदाचित् आख्यायिकेतिहासपुराणाकर्णनेन सुहृत्परिवृतो दिवसमनयत्।

एकदा तु राजानम् आस्थानमण्डपगतं प्रतीहारी समुपसृत्य क्षितितलनिहितजानुकरकमला सविनयमब्रवीत्। "देव, दक्षिणापथात् आगता चाण्डालकन्यका पञ्जरस्थं शुकमादाय देवं विज्ञापयति। 'देवः सकलभुवनतलसर्वरत्नानाम् उदधिरिव एकभाजनम्। विहङ्गमश्च अयं आश्चर्यभूतः, निखिलभुवनतलरत्नामिति कृत्वा आगता अहं देवदर्शनसुखमनुभवितुम्' इति। एतदाकर्ण्य देवः प्रमाणम्" इत्युक्त्वा विरराम।

उपजातकुतूहलश्च राजा समीपवर्तिनां राज्ञाम् अवलोक्य मुखानि, 'को दोषः? प्रवेश्यताम्' इति आदिदेश। अथ प्रतीहारी तां मातङ्गकुमारीं प्रावेशयत्। अवनिपतिस्तु तां पुरुषेण अधिष्ठितपुरोभागां, पञ्जरमुद्वहता चाण्डालदारकेण अनुगम्यमानाम्, अतिशयरूपाकृतिम् अनिमिषलोचनो ददर्श।

दृष्ट्वा च तां जातविस्मयस्य अभूत् मनसि महीपतेः। 'अहो विधातुः अस्थाने सौंदर्यनिष्पादनप्रयत्नः! **सर्वथा धिक् विधातारम् असदृशसंयोगकारिणम्!** अतिमनोहराकृतिरपि क्रूरजातिजा।' एवमादि चिन्तयन्तमेव राजानं चाण्डालकन्यका प्रणनाम।

कृतप्रणामायां च तस्यां, स पुरुषः विहङ्गम् आदाय पञ्जरगतम् एव, किञ्चित् उपसृत्य राज्ञे न्यवेदयत् अब्रवीच्च। "देव, विदितसकलशास्त्रार्थः, राजनीतिप्रयोगकुशलः, काव्यनाटकानाम् अध्येता, स्वयं च कर्ता, वैशंपायनो नाम शुकः अयम्। 'सर्वरत्नानाम् उद-

धिरिव देवो भाजनम्' इति कृत्वा पक्षिरत्नमेतत् आदाय अस्मत्स्वामिदुहिता देवपादमूलमायाता। तत् अयं शुकः आत्मीयः क्रियताम्" इत्युक्त्वा नरपतेः पुरो निधाय पञ्जरमपससार।

अपसृते च तस्मिन्, विहङ्गराजः राजाभिमुखो भूत्वा, उन्नमय्य दक्षिणं चरणं, स्पष्टगिरा जयशब्दं कृतवान्। राजानं च उद्दिश्य तद्धीर्यस्तुतिपराम् आर्यामेकां पपाठ।

राजा तु तां श्रुत्वा संजातविस्मयः, सहर्षं शुकमब्रवीत्। "अपनयतु नः कुतूहलम्। आवेदयतु भवान् आदितः प्रभृति आत्मनो जन्म कस्मिन् देशे? भवान् कथं जातः? केन वा नाम कृतम्? का माता? कस्ते पिता? कथं वेदानामागमः? कथं शास्त्राणां परिचयः? कुतः कलाः समासादिताः? किं जन्मान्तरानुस्मरणम्, उत वरप्रदानम्? अथवा विहगवेषधारी कश्चित् छद्मो निवससि? क्व वा पूर्वमुषितम्? कियद् वा वयः? कथं पञ्जरबन्धः? कथं चाण्डालहस्तगमनम्? इह वा कथम् आगमनम्" इति।

शुकस्तु मुहूर्तमिव ध्यात्वा सादरमब्रवीत्। 'देव, महतीयं कथा। यदि कौतुकम् आकर्ण्यताम्।'

इत्यभिधाय स जाबालिकथितम् आत्मनो जन्मद्वयवृत्तान्तं कात्स्न्र्येन आचचक्षे। पुनश्च अब्रवीत्—'का इयं चाण्डालकन्यका, किमर्थं वा अहं बद्धः, किमर्थं वा इह आनीतः इत्यत्र वस्तुनि अहमपि देवः इव अनपगतकौतुकः एव' इति।

राजा तु तत् श्रुत्वा समुपजाताभ्यधिककुतूहलः चाण्डालकन्यकायाः आह्वानाय प्रतीहारीमादिशत्। अचिरादेव प्रविश्य चाण्डालकन्यका राजानम् अभिभवन्तीव धाम्ना, प्रागल्भ्येन बभाषे। "भुवनभूषण, रोहिणीपते, कादम्बरीलोचनानन्दचन्द्र, सर्वः त्वया अस्य दुर्मतेः आत्मनश्च पूर्वजन्मवृत्तान्तः श्रुतः एव।

अत्रापि जन्मनि पितुः आज्ञाम् उल्लंघ्य वधूसमीपं प्रस्थितः तदपि अनेन स्वयमेव कथितम्। तदहं अस्य दुरात्मनः जननी श्रीः। तथा-प्रस्थितमेनं दिव्येन चक्षुषा दृष्ट्वा अस्य पित्रा अहं समादिष्टास्मि। **'सर्वः एव हि अविनयप्रवृत्तः अनुतापाद्विना न निवर्तते।** तदयं ते तनयः कदाचिदस्याः अपि तिर्यग्जातेः अधस्तात् पतति। तत् यावदिदं कर्म न परिसमाप्यते, तावदेनं मर्त्यलोके एव बद्ध्वा धारय। यथा च अनुतापः अस्य भवति, तथा प्रतिविधेयमस्य' इति। तत् अस्य विनयाय इदं सर्वं कृतं मया। अधुना तु तत्कर्म समाप्तम्। शापावसानसमयो वर्तते। शापावसाने च युवाभ्यां सममेव सुखिभ्यां भवितव्यम् इति त्वत्समीपमानीतः मया अयम्। अत्रापि यत् चाण्डालजातिः ख्यापिता तत् लोकसंपर्कपरिहाराय। तत् अनुभूयतां संप्रति द्वाभ्यामपि समेव जन्मजरा-व्याधिमरणादिदुःखबहुले तनू परित्यज्य, यथेष्टजनसमागम-सुखम्"। इति अभिदधाना एव सा झटिति क्षितेः गगनम् उदपतत्।

---

३६ शापावसानम्

अथ शूद्रकः चाण्डालकन्यकायाः तद्वचनमाकर्ण्य संस्मृत-जन्मान्तरः, 'सखे, वैशम्पायनाख्यपुण्डरीक, दिष्टया तुल्यकाल-मेव आवयोः शापावसानं संजातम्' इति अभिदधौ। तावता एव क्षणेन कादम्बरीविरहवेदनया तस्य अङ्गानि परवशानि अजायन्त। देहम् उत्सृज्य निर्जग्मुः श्वासमरुतः। पाण्डुतां च

वदनलावण्यमयासीत्। तुल्यावस्थश्च अभवत् महाश्वेतोत्कण्ठया वैशंपायनः।

तस्मिन् एव च अन्तरे प्रवर्तमाने सुरभिमासे कादम्बरी पर्याकुलितहृदया चन्द्रापीडम् अतिसुरभिशीतलैः स्नापयित्वा अम्भोभिः, कर्पूरकुसुमप्रायैः प्रसाध्य आभरणविशेषैः, जीवन्तमिव कण्ठे जग्राह। चन्द्रापीडस्य तु तेन अमृतसेकाह्लादिना कादम्बरीकण्ठग्रहेण सद्यः सुदूरगतमपि पुनर् जीवितं प्रत्यपद्यत। स सुप्तप्रतिबुद्ध इव कादम्बरीं चिरविरहदुर्बलाभ्यां लोचनाभ्यां पिबन्निव अवादीत्।

"भीरु, त्यज्यतां भयम्। प्रत्युज्जीवितोऽस्मि तवैव अमुना कण्ठग्रहेण। त्वं खलु अमृतसंभवात् अप्सरसां कुलात् उत्पन्ना। एतावन्त्येव दिनानि पाणिना ते स्पृश्यमानोऽपि न यत् प्रत्युज्जीवितोऽस्मि तत् शापदोषात्। अद्य तु स मे व्यपगतः शापः। परित्यक्ता सा मया त्वद्विरहदुःखदायिनी मानुषी शूद्रकाख्या तनुः। अपि च प्रियसख्याः अपि ते महाश्वेतायाः प्रियतमः, मया एव सह विगतशापः सञ्जातः।" इति अभिदधत्येव चन्द्रापीडे अम्बरतलात् अवतरन् अदृश्यत कपिञ्जलकरावलम्बी पुण्डरीकः।

दृष्ट्वा च तं दूरतः एव, कादम्बरी स्वयमेव धावित्वा कण्ठे अग्रहीत् महाश्वेताम्। चन्द्रापीडस्तु पुण्डरीकं परिष्वज्य अब्रवीत्— "सखे पुण्डरीक, यद्यपि प्राग्जन्मसम्बन्धात् जामाता असि, तथापि अनन्तरजन्माहितसुहृत्स्नेहसद्भावेनैव मया सह वर्तितव्यं भवता।" इत्येवं च वदत्येव चन्द्रापीडे चित्ररथहंसौ दिष्ट्या वर्धयितुं केयूरको हेमकूटमगमत्। मदलेखापि धावमाना निर्गत्य मृत्युञ्जयजपव्यग्रस्य तारापीडस्य विलसवत्याश्च पादयोः पतित्वा

'देव, देव्या सह दिष्ट्या वर्धसे, प्रत्युज्जीवितः युवराजः समं वैशंपायनेन' इति आनन्दनिर्भरम् उच्चैर्जगाद।

राजा तु तच्छ्रुत्वा हर्षपरवशो विलासवतीं कण्ठे अवलम्ब्य, मदलेखां 'क असौ? क असौ?' इति पुनः पुनः पृच्छन्, सह शुकनासेन तत्रैव आगच्छत्। दृष्ट्वा च तथा पुण्डरीककण्ठे लग्नं चन्द्रापीडम् आनन्दनिर्भरः शुकनासमवादीत् तारापीडः। 'दिष्ट्या न एकाकिना मया तनयप्रत्युज्जीवनसुखम् अनुभूतम्' इति। चन्द्रापीडस्तु तथा हर्षपरवशं पितरमालोक्य चरणयोः अपतत्।

अथ तारापीडः तं तथा प्रणतमभ्यधात्। 'पुत्र, यद्यपि पिता अहं तव शापदोषात् मम पुण्यबलाद्वा सञ्जातः, तथापि जगद्वन्दनीयो लोकपालस्त्वम्। त्वमेव नमस्कार्यः।' विलासवती तु चन्द्रापीडं पुनः पुनः शिरसि, पुनर्ललाटे, पुनश्च कपोलयोः चुम्बित्वा गाढतरं सुचिरम् आलिलिङ्ग। उन्मुक्तश्च मात्रा चन्द्रापीडः उपसृत्य 'एष वो वैशंपायनः' इति पित्रोः, शुकनासस्य, मनोरमायाश्च अदर्शयत्।

तस्मिन्नेव च अन्तरे समं मदिरागौरीभ्यां चित्ररथहंसौ गन्धर्वराजौ अपि तत्रैव आजग्मतुः। आगतयोश्च तयोः जामातृदर्शनसमुत्फुल्लनयनयोः सहस्रगुणः इव महोत्सवामोदः प्रावर्तत। अथ चित्ररथः तारापीडमवादीत्। 'विद्यमाने स्वभवने किमर्थं अरण्ये महोत्सवः क्रियते? अपि च यद्यपि अस्माकम् अयमेव धर्म्यो विवाहः तथापि लोकसंव्यवहारः अनुवर्तनीयः एव। तत् गम्यतां तावत् अस्मदीयमवस्थानम्।'

तारापीडस्तु तं प्रत्युवाच। 'गन्धर्वराज, **यत्रैव निरतिशयं संपत्सुखं तदेव वनमपि भवनम्।** तदीदृशं क अपरत्र संपत्सुखं मया प्राप्तम्। अन्यच्च संप्रति सर्वगृहाण्येव

मया जामातरि ते संक्रामितानि । तत् वयस्य, वधूसमेतं तमेव आदाय गम्यतां गृहसुखानुभवाय' इति । चित्ररथः तथा अभिहितः, 'राजर्षे, यथा ते रोचते' इत्युक्त्वा, चन्द्रापीडमादाय हेमकूटमगात् ।

गत्वा च तत्र चित्ररथः कादम्बर्या सह समग्रमेव स्वराज्यं चन्द्रापीडाय न्यवेदयत्; पुण्डरीकाय अपि समं महाश्वेतया निजपदं हंसः । तौ तु हृदयरुचितवधूलाभमात्रकेणैव कृतार्थौ, न किञ्चित् अपि अपरं प्रत्यपद्येताम् ।

अथ अन्यस्मिन् काले हृदयवल्लभलाभमुदितापि कादम्बरी विषण्णमुखी चन्द्रापीडमूर्तिं चन्द्रमसम् अप्राक्षीत् । 'आर्यपुत्र, सर्वे खलु वयं मृताः सन्तः प्रत्युज्जीविताः, परस्परं संघटिताश्च । सा पुनर्वराकी पत्रलेखा अस्माकं मध्ये न दृश्यते । न विद्मः किं तस्याः केवलायाः वृत्तम्' इति । चन्द्रापीडमूर्तिश्चन्द्रमाः तच्छ्रुत्वा प्रीतान्तरात्मा प्रत्यवादीत् । "प्रिये, कुतोऽत्र ? सा हि खलु मद्दुःखदुःखिता रोहिणी शप्तं माम् उपश्रुत्य 'कथं त्वम् एकाकी मर्त्यलोकनिवासदुःखम् अनुभवसि ?' इत्यभिधाय मच्चरणपरिचर्यायै निवार्यमाणा अपि मर्त्यलोके जन्म अग्रहीत् । इतश्च जन्मान्तरं गच्छता मया पुनरपि मर्त्यलोकम् अवतरन्ती बलात् आवर्ज्य आत्मलोकं विसर्जिता । तत्र पुनः तां द्रक्ष्यसि' इति । कादम्बरी तु तच्छ्रुत्वा रोहिण्याः उदारतया स्नेहलतया महानुभावतया पतिव्रततया च विस्मितहृदया परं लज्जिता न किंचिदपि वक्तुं शशाक ।

ततः चन्द्रापीडः एकदिवसमिव दशरात्रं स्थित्वा हेमकूटे, परितुष्टहृदयाभ्यां श्वशुराभ्यां विसर्जितः पितुः पादमूलम् आजगाम ।

आगत्य च समकालमेव अनुभूतक्लेशं राजलोकं आत्मसमं कृत्वा, समारोपितराज्यभारः पुण्डरीके, पित्रोः पादौ अनुचरन्, कदाचित् जन्मभूमिस्नेहात् उज्जयिन्यां, कदाचित् गंधर्वराजगौरवेण हेमकूटे, कदाचित् रोहिणीबहुमानेन चन्द्रलोके वसतिं चक्रे। ततः प्रभृति न केवलं चन्द्रमाः कादम्बर्या सह, कादम्बरी महाश्वेतया सह, महाश्वेता तु पुण्डरीकेण सह, पुण्डरीकोऽपि चन्द्रमसा सह परस्परावियोगेन सर्वे एव, सर्वकालं, सर्वसुखान्यनुभवन्तः परां कोटिम् आनन्दस्य अध्यगच्छन्।

समाप्तेयं कथा।

टिप्पणी

Figures indicate pages

१

काननम्— अरण्यम्

अच्छोदाभिधानम्— अच्छम् उदकं यस्य तत् अच्छोदम्; अच्छोदं अभिधानं (नाम) यस्य तत्,

सरः— जलाशयः

भवानीपतेः— पार्वतीपतेः, शङ्करस्य

आयतनम्— मन्दिरम्

अर्कः— सूर्यः

सोमः— चन्द्रः

सम्भूतानि— जातानि

उपयेमे— परिणिनाय, विवाहम् अकरोत्

आत्मजा— कन्या; आत्मनः जाता

मालाविपर्ययः— मालाविनिमयः

२

मधुमासः— चैत्रमासः

अम्बया— जनन्या

व्याहरन्ती— वदन्ती; भाषमाणा

अनाघ्रात— अन् + आघ्रात not smelt घ्रा— जिघ्रति; घ्रात

उपारूढकौतुका— उपारूढं कौतुकं यस्याम् (ब. स.) in whom curiosity was produeod

मधुकरी— भ्रमरी

कर्णावतंसीकृताम्— used as an ear ornament (i. e. placed on the ear).

अवतंसः- सम्—कर्णभूषणम्

अदूरकोपा— शीघ्रकोपा, (अदूरः कोपः यस्याः सा)

किमभिधानः— किम् अभिधानं यस्य सः

सौरभम्— आमोदः

सुरासुरवन्दितचरणयुगलः— सुराः असुराश्च तैः वन्दितं चरणयुगलं यस्य

किं अनेन पृष्टेन?— किं प्रयोजनं अनेन प्रश्नेन?

मन्दाकिनीम्— स्वर्गङ्गाम्

संनिहिता— समीपे स्थिता

पुण्डरीकम्— श्वेतकमलम्

आलोकमात्रेण— दर्शनेन केवलेन

क्रियाः— संस्कारान्

पादपस्य— वृक्षस्य

३

उत्सङ्गे— अङ्के, on the lap
आदाय— गृहीत्वा
प्रश्रायासेन— प्रश्नपरिश्रमेण
रुचितसुरभिपरिमला — रुचितः सुरभिः परिमलः यस्याः
किंचिदुपदर्शितस्मितः — किंचित् उपदर्शितं स्मितं येन; किंचित् स्मितं कृत्वा
श्रवणात् — कर्णात्
तरलाङ्गुलेः— तरलाः (कम्पिताः) अङ्गुलयः यस्य सः तरलाङ्गुलिः
पुलकितम् — रोमाञ्चितम्
सलीलम् — लीलया सहितं यथा स्यात् तथा;लीलया, playfully
भर्तृदारिके— राजपुत्रि
प्रत्यासीदति — आसन्नः (समीपः) भवति
मज्जनविधिः— स्नानविधिः

४

क्षुद्रजनक्षुण्णः— क्षुद्रजनेन आचरितः
विगतचेतनत्वम् — अन्यत्रगतमानसत्वम्; विमनस्कता, absent-mindedness
दुर्विनीत— कुशिक्षित mischievous
मर्षयामि— क्षाम्यामि
अलीककोपेन— मिथ्याकोपेन
सविधम्— (अ.) सन्निधौ
एकावलीम्— मौक्तिकमालाम्

५

अतिनिभृतपदः — अतिनिभृतानि (निःशब्दानि noiseless) पदानि यस्य सः; निर्घोषसंचारः
विश्रब्धम्— सविश्वासम्

६

सञ्जातवितर्कः — सञ्जातः वितर्कः (शङ्का) यस्य
विटपान्तरितविग्रहः — विटपैः (वृक्षैः) अन्तरितः (छादितः) विग्रहः (शरीरं) यस्य
अशोभनम्— अनिष्टम्
अपगतनिमेषेण चक्षुषा — पक्ष्मपातरहितेन नयनेन; with an unwinking, i. e. steady eye.
एकपदे (अव्यय)— सहसा; सपद्येव

७

वचनं आक्षिप्य— भाषणं प्रतिबध्य cutting short the speech (बोलणें मध्येंच थांबवून)
ह्रदे—सरोवरे
प्रतिपत्तव्यम् — अङ्गीकर्तव्यम्

८

उपलभ्य— ज्ञात्वा

कालातिपातः — वेलातिक्रमः (कालस्य अतिपातः)
सांप्रतम्— उचितम्
एनः— पापम्
हृदयदयितम्— हृदयप्रियम्
प्लाव्यमानः— being flooded द्रवेण व्याप्यमानः (प्लु १ आ.)
भुवनान्तरालम्— भुवनयोः अन्तरालम्
अवगुण्ठनम्— आच्छादनम्
रक्तांशुकेन— रक्तवस्त्रे

९

निर्घृण— निर्दय
कुमुदम्— श्वेतकमलम्

१०

व्यतिकरेण— वृत्तान्तेन
क्षपाम्— रात्रिम्
प्रत्युषसि— प्रभाते
स्थाणुम्— शिवम्
व्यावर्तयितुम्— निवर्तयितुम्
व्याजेन— मिषेण

११

पर्यङ्के— शयने, मञ्चके
अनिर्वृतः— दुखितः
अपगतामर्षः — अपगतः अमर्षः (क्रोधः) यस्य
विमृशन्— विचारयन्
व्यतिकरम्— सम्बधम्
मयूखः— किरणः
वारद्वयम्— द्विवारम्, twice
वीप्सा— पुनरुक्तिः, द्विरुक्तिः
चरितार्था— सफला, सार्था, यथार्था
तुरङ्गमेण— अश्वेन

१२

गीर्वाणवर्त्मना— देवमार्गेण, नभसा
उद्दामप्रचारिणा — उद्धतं गच्छता
उपसंहर— निवर्तय
अवसाने— मरणे

१३

त्रिभुवनललामभूता — त्रिभुवनभूषणभूता
प्रतिमः— सदृशः
अविषण्णधीः— अविषण्णा (अकुण्ठिता) धीः (बुद्धिः) यस्य
अन्तरान्तरा— मध्ये मध्ये
अनपत्यताजन्मा — अनपत्यतायाः जन्म यस्य सः
कृताभ्युत्थानाम्—स्वागतार्थम् उत्थानं कृतवतीम्
करङ्कः— करण्डकः
परिग्रहः— स्वीकारः
अवदातम् कर्म— पुण्यकर्म

१४

जन्मान्तरविहितम् — अन्यस्मिन् जन्मनि कृतम्
अभियुक्तेन— पण्डितेन
मानुष्यके— मनुष्यजातौ (मनुष्यशक्तौ इत्यर्थः)

उपपादयितुम्— कर्तुम्
परिणतवयाः— परिणतं वयः यस्य सः; वृद्धः
अमोघफला— अमोघं फलं यस्याः सा that never fails as to the fruit
पूर्णपात्रम्— प्रियनिवेदकेन गृह्यमाणं अलङ्कारवस्त्रादिकम्; a present of clothes or ornaments claimed by an attendant who brings some happy news
अप्रतिविधेये— प्रतिकर्तुम् अशक्ये
शोकानुबन्धः— शोकसातत्यम्
सपर्या— पूजा
क्षीणभूयिष्ठायाम् — क्षीणं भूयिष्ठं यस्याः, तस्याम्

१५

अवितथफला— अवितथं (सत्यं, अवश्यंभावि) फलं यस्याः सा (सफला)
स्निग्धेन— स्नेहपूर्णेन

१६

अनुबध्नाति— अनुसरति
ब्राह्मणसात्— ब्राह्मणाधीनम्
चूडाकरणम्— चौलकर्म
अनुशिप्रम् — शिप्राम् अन्वायतम्, along the river शिप्रा
परिखा— खातम् (खंदक इति महाराष्ट्रभाषायाम्) ditch
कलापः— समूहः
सहजा— सह जाता, natural

१७

श्रमः— व्यायामः
महाप्राणता — महत् शारीरबलम्, great strength
उपगृहीतशिक्षम् — अधीतविद्यम्
प्रविष्टोऽसि षष्ठं अनुभवन् वर्षम्— षष्ठं वर्षं अनुभवन् (त्वं) (गुरुगृहं) प्रविष्टोऽ सि, षष्ठे वर्षे इत्यर्थः
इति कृत्वा — इति मत्वा, so thinking

१८

यत्सत्यं (अव्यय)— नूनम् (खरोखरच इति भाषायाम्)
आमंत्रयांबभूव — संबोधयांचकार addressed

१९

उच्चैश्रवाः— इन्द्रस्य अश्वः
परिचारार्थं— सेवार्थम्
सदैवता— दैवतेन सह (युक्ता) (ब. स.)
हेषारवः (अश्वस्य शब्दः)

२०

पीठम्— आसनम्
उपगूढः— आलिङ्गितः
कृतावतरणमङ्गला— कृतम् अवतरणमङ्गलं यया (अवतरणम्—

' लिंबलोण उतरणें ')

२०

लम्भिता— प्रापिता
समृद्धाः— फलिताः; पूर्णाः
उदन्तेन — वृत्तेन (उदन्तः— happening, occurrence)

२१

रजतम्— रूप्यम्
तद्गुणाः— (चन्द्रापीडस्य गुणाः)
अस्मै— (चन्द्रापीडाय)
यवसम्— तृणम्
आकीर्य— प्रक्षिप्य

२२

अपरेद्युः—अन्यस्मिन् दिवसे
क्वणितमणिनूपुराकुलचरणयुगलया — शब्दायमानैः मणिनूपुरैराकुलितं (युक्तम्) चरणयुगलं यस्याः सा, तया
दुहितृनिर्विशेषम्— दुहितुः निर्गतो विशेषः यस्मिन् कर्मणि; कन्यातुल्यम्
बन्दिन्— ' कैदी ' इति भाषायाम्; a prisoner
विश्रम्भेषु— रहस्यवस्तुषु
नियतम्— निश्चितम्

२३

आयतनम्— स्थानम्
कालुष्यमुपयाति — मलिनीभवति (कलुषस्य भावः कालुष्यम्)
रजनिकरगभस्तयः — चन्द्रस्य किरणाः
प्रतिशब्दकः— प्रतिध्वनिः
अभिनिवेशः— आसक्तिः, आग्रहः

२४

कामम्— अत्यर्थम्
समारोपितसंस्कारः— समारोपिताः (कृताः) संस्काराः यस्य सः

२५

दुकूलम्— क्षौमम् (रेशमी वस्त्र)
शेखरः—उत्तंसः, शिरोभूषणम् (' तुरा ' Marathi)
समुत्सारणम्— जननिवारणम्
आस्थानम्— सभागृहम्

२६

करेणुका— करिणी, हस्तिनी (हत्तीण Mar.)
चक्रवालः— समूहः
सनाथीकृतः— सहितः
पुरोभागः— अग्रभागः
शातक्रतवी— प्राची (शतक्रतोः— इन्द्रस्य—इयम्)
आशा— दिक्, दिशा
कुञ्जरः— गजः
प्रसाधितानि— गृहीतानि, जितानि
पादपीठे— पदासने
घृष्ट— घृष् I. P.

चूडामणिः— शिरोमणिः
क्षितिः— पृथ्वी
समुच्छ्रित— (सम् + उद् + श्रि 1 U. P. P.) उन्नत
आवासभूमिम्—सेनायाः तात्कालिकं निवासस्थानम्

२७

यामिनी— रात्रिः, निशा
समीकुर्वन्— सरलीकुर्वन्; नतोन्नत-विरहिताः कुर्वन्
प्रतीच्छन्— स्वीकुर्वन्

२८

किन्नरमिथुनम् — अश्वमुखद्वयम्, किन्नरदम्पती
रभसाकृष्टचेताः— रभसेन (अति-वेगेन) आकृष्टं चेतः यस्य सः
समुपारूढम्— व्याप्तम्
गुर्वर्थः— गुरोः (पितुः) अर्थः (कार्यम्)
अविरल— निबिड, घन
गुल्म — लताजालम्; a bush or thicket
लतासंतानम्—लतानाम् आकुलत्वम्
मर्त्यधर्मा— मनुष्यः

२९

व्यावर्तयामास— निवर्तयामास
अत्यायतम्— अतिविस्तीर्णम्
तरुखण्डम्— तरुसमूहम्
शीकरिणा— तुषारयुक्तेन
अन्तः— सीमा
अवधिः— मर्यादा
आप्याययति— (आ+प्यै 1. A. Caus.) पूरयति; प्रीणयति

३०

समुच्चरन्तम्— प्रसरन्तम्
शूलपाणेः— शङ्करस्य
असमर्थितम्— अतर्कितम्

३१

कृतम्— (अव्यय) अलम्
अतिथिसपर्याम्— अभ्यागतपूजाम्

३२

आमीलित— संकुचित
अनुरोधात्— विज्ञप्त्या
विबुधाः— देवाः

३३

वीजयन्— वातं प्रवर्तयन्; fanning
शठहृदयम्— शठं हृदयम् (कर्मधा. स.)
अप्रयोजनम— निरर्थकम्
हतशरीरं— हतं (दुष्टं) शरीरम्

३४

उपरत— मृत
एनसा— पापेन
मकरकेतुः— (मकरः केतुः यस्य) मदनः

समागमसरस्वती — समागमसूचका सरस्वती (वाणी)
धीरा हि— धीरा एव

३५

बालमित्रम्— बालं मित्रम् (कर्मधा. स.)
उत्लक्ष्यामि— त्यक्ष्यामि
त्वं शरणं— त्वमेव आश्रयः
गुरुवचनम्— पितृवचनम्
अवितथम्— न वितथम्, सत्यम्

३६

कलयसि— मन्यसे

३७

पीठिकायाम्— आसने

३८

प्रणयितां— स्नेहवत्ताम्
व्यपदेशेन— मिषेण
श्वेतभानुः— चन्द्रः

३९

भावयन्— चिन्तयन्
क्षणदा— रात्रिः
क्षपितवान्— नीतवान्
कुमारस्य— (चन्द्रापीडस्य)

४०

स्कन्धावारम्— सैन्यम्

४२

लेखनवाचनविरतिरेव प्रयाणकालतां नेतव्या— पत्रवाचनावसाने एव प्रतिष्ठस्व (पत्र वाचून होतांच नीघ)

४३

प्रव्रज्या— संन्यासः
अरज्यत— अनुरक्तः अभवत्
सप्तसप्तिः— सप्त सप्तयः (अश्वाः) यस्य सः (सूर्यः)
निसृष्ट— दत्त
घनविसरः— घनसमूहः

४४

गोष्ठी— सम्भाषणम्
आपन्नवत्सला — आपन्नेषु (शरणागतेषु) वत्सला (स्नेहयुक्ता)

४५

अयोघनः— अयसः (लोहस्य) घनः

४६

परापतामः— निवृत्य गच्छामः
अथ— यदि
प्रसाध्य— आत्मसात् कृत्वा, जित्वा

४७

भद्रकम्— कल्याणम्
अनुपदम्— (पदम् अनुसृत्य) पश्चात् (पाठोपाठ, मागोमाग)
भूमिं यावत्— भूमिपर्यन्तम्

४८

निरूप्यताम्— (नि+रूप् 10 P.) अन्विष्यताम् (Mar. पहावी)

सम्भावितः— ज्ञाताः
देशिकः— मार्गदर्शकः
यानपात्राभ्यागमः— यानपात्रम्— (यानस्य-गमनस्य-पात्रम्) a boat; प्रवहणादिकं, तस्य अभ्यागमः (प्राप्तिः)
अपररात्रः (रात्रेः अपरः—उत्तरः—भागः) उत्तररात्रः

४९

उत्कर्णः— उद्गतौ कर्णौ यस्य सः
तर्णकः— वत्सकः

५०

निगडितौ— बद्धौ
जीवितेन शपामि— (मराठी-गळ्याची शपथ)
परिकरः— परिवारः

५१

गार्हस्थ्ये— गृहस्थाश्रमे
आक्षिप्तचेताः— व्यग्रमनाः
राजकम्— राज्ञां समूहः
अमुक्तिपक्षम्—मुक्तिः न भवेत् इति संभवम्

५२

परिबोधनम्— उपदेशः

५३

अमर्षः— क्रोधः
विरूपकम्— विरुद्धम् आचरणम्
कशा— चर्ममयी रज्जुः (चाबुक)
अन्तरा— मध्ये

५४

गणकः— ज्योतिर्विद्
लग्नम्— उदितः राशिः; ' राशीनां उदयो लग्नम् '
स्रज्— माला
अपहृर्षदृष्टिः—अपगतः हर्षः यस्याः, एतादृशी दृष्टिः यस्य
तत् एकधा— प्रथमं तावत् (in the first place)
आस्ताम्— भवतु, तिष्ठतु

५५

आत्ययिकम्—अत्यवश्यम् (urgent; निकडीचें)
शरीरस्थितिकरणाय— शरीरव्यापारकृते
पारयति— शक्नोति
दुःखासिका— दुःखं आस्यते अस्याम् इति; चिन्ता
वृत्तम्— सदाचरणम्

५६

वाच्यात्— जनापवादात्
विपरिवर्तते— विलीनः भवति
हर्षहेषारवः— प्रमोदध्वनिः, हर्षसूचकः अश्वशब्दः
पुनर्निवारणम्— पुनर्गमन-प्रतिषेधः
कायमानं — उटजम् (Mar. झोपडी)
गव्यूतिः— क्रोशद्वयम्
अवहत्— अचलत्

वैलक्ष्यम्— लज्जाम्

५७

अवहिताः— सावधानाः
खिन्नः— श्रान्तः
अभिज्ञा— जानती

५८

उदीरितायाम्— उक्तायाम्

५९

व्याजीकृत्य— मिषीकृत्य

६०

निर्वापयामि— सान्त्वयामि, शीतलीकरोमि

६१

आप्यायमानम्— पोष्यमाणम्
लब्धसंज्ञा— प्राप्तचैतन्या (लब्धा संज्ञा यया; प्रकृतिम् आपन्ना)
आच्छिद्य— बलात् गृहीत्वा

६२

गतः अहम्— अहं गमिष्यामि

६३

अनुवृत्तिः— सेवा
अपचितिः— पूजा

६५

विनाकृतानाम्— रहितानाम्
वर्तमाने— वर्तमानकाले

६६

उपयाचितम्— 'नवस' इति महाराष्ट्रभाषायाम्

६८

स्वस्थवत्— स्वस्मिन् स्थितः स्वस्थः; दुःखरहितः

६९

आत्मजतां— पुत्रत्वम्
अन्तरित—व्यवहित, concealed, covered
बुध्यते— जानाति
प्रलघुपरिकरः— स्वल्पपरिवारः

७१

विरूपैः— अशुभैः
समुपनमितः— प्रापितः
नियतिः— दैवम्
जरापीतसारतनवः— जरया पीतं सारं (बलं) यासां, एवंभूताः तनवः येषाम्
आसज्य— न्यस्य
संस्तुतजनः— परिचितजनः
निवसनरुचिः— वस्त्राभिलाषः
आहारहार्दम्— भोजनप्रेम
नर्मालापः— विनोदः, क्रीडालापः
अक्षसूत्रेषु— जपमालिकासु

७२

वेलावनम्— तटकाननम्
लग्ना— संबद्धा
मध्यदेशः—विन्ध्यहिमालययोः मध्यम्

७३

कदम्बकम्— समूहः

शिरोधरा— ग्रीवा; neck
आपतितम्— आगतम्
शबरः— भिल्लः
कर्कशः— 'राठ,' 'राकट' इति महाराष्ट्रभाषायाम्; rough
केसरि-कृत्तिः— सिंहचर्म
पिशितम्— मांसम्
उपहारः— भगवत्यै दीयमानं सत्त्वादि
शकुनिः— पक्षी

७४

व्यलम्बत— विलम्बं चकार
अपगतासुः— अपगताः असवः (प्राणाः) यस्य सः
एवम्— तथा हि; अनेनैव न्यायेन

७५

खल (वि०)— दुष्ट
उपपादयेत्— कुर्यात्
उद्भासमानः— दीप्यमानः
सिष्णासुः— स्नातुम् इच्छुः

७७

भारती— वाणी
संवृत्ता— सञ्जाता

७८

मूढतायाम्— अज्ञानतायाम्, अज्ञानतासमये
तरलहृदयताम्— चञ्चलचित्तताम्
अनुबध्नासि— न परित्यजसि

७९

रसाक्षेपात्— रसाकर्षणात्
अचेतिता— अज्ञाता
भवः— जन्म
विकासहासिना— विकासेन हसति इति; smiling heartily
दिष्ट्या— भाग्येन

८०

उत्क्षिप्य— उद्गृह्य 'उचलून' इति महाराष्ट्रभाषायाम्
इतरवत्— प्राकृतजनवत्, अशिक्षितजनवत्
तातस्य— (श्वेतकेतोः)
श्रिया— लक्ष्म्या (पुण्डरीकस्य मात्रा)
खरः (वि.)— कठिनः
खलीनम्— लगामाचा लोखंडी भाग, bit of the bridle ('लगामाचें कड्याळें' इति महाराष्ट्रभाषायाम्)

८१

ककुभ्— दिशा
अवाशीर्यन्त इव— विदीर्णानि इव

८२

प्रबोधः— जागरः
आशये— मनसि
अस्निग्धः— रूक्षः, कठोरः
अथ— यदि
पक्कणः— चाण्डालग्रामः

प्रभवति— समर्था भवति
अशनिः— वज्रम्
येन— (येन कारणेन)

८३

जातिस्मरः— जातिं स्मरति इति
धर्मः— पुण्यम्
पापजननम्— पापस्य उत्पादकम्
घृणा— जुगुप्सा (तिरस्कार, वीट इति भाषायाम्)
पुण्यानि— पुण्यकर्माणि

८४

अपरम्— (अ.) अन्यत्र, इतरत्र
आक्षिप्य— संयम्य, निरुध्य
निर्वेदात्— अपरितोषात् (कंटाळून)

८५

चाण्डालजात्यनुचितेन— °जात्यनपेक्षितेन
पाकशासनः— इन्द्रः
धौरेयः— धुरि भवः; अग्रगण्यः, मुख्यः
वर्णसंकराः— mixture of colours; intermixing of different castes (वर्णसंकर existed only in painting)
शास्त्रेषु चिन्ता— reflection only as to शास्त्र; (there was no चिन्ता–anxiety)
प्रजानाम्— प्रजासु

८६

करग्रहणम्— taking the hand in marriage; levying taxes.
प्रथमे वयसि वर्तमानः– in the prime of youth.
दक्षिणापथात्— दक्षिणमार्गात् (भरतवर्षस्य दक्षिणभागात्) from the Deccan
अधिष्ठितपुरोभागाम्— अधिष्ठितः पुरोभागः यस्याः; who went before her
न्यवेदयत्— अर्पयामास

८७

धाम्ना— तेजसा

८८

इदं कर्म— इदं अनुष्ठानम्
प्रतिविधेयम्— करणीयम्, कर्तव्यम्
ख्यापिता— कथिता

९१

आवर्ज्य— संतोष्य
आत्मलोकम्— आत्मनः लोकम् (चन्द्रलोकम् इत्यर्थः)

सुभाषितानि

पृष्ठम्

१ अदूरकोपा मुनिजनप्रकृतिः । २
२ धैर्यधना हि साधवः । ४
३ सुहृद् असन्मार्गप्रवृत्तः सर्वात्मना निवारणीयः । ७
४ सुखम् उपदिश्यते परस्य । ७
५ आशया हि किमिव न क्रियते ? १०
६ आवेदयन्ति हि प्रत्यासन्नम् आनन्दम् अभ्रजातानि शुभानि निमित्तानि १५
७ विपत् विपदं संपत् संम्पदमनुबध्नाति । १५
८ आत्मकृतानां हि दोषाणां नियतमनुभवितव्यं फलम् आत्मनैव । २९
९ जगति जन्तूनां असमर्थितोपनतानि आपतन्ति वृत्तान्तान्तराणि । ३०
१० आपतन्ति हि संसारपथमवतीर्णानाम् एते वृत्तान्ताः । ३४
११ धीरा हि तरन्त्यापदम् । ३४
१२ दुःखितमपि जनं रमयन्ति सज्जनसमागमाः । ३८
१३ बहुभाषिणि न श्रद्दधाति लोकः । ३९
१४ राजा कालस्य कारणम् । ५४
१५ यस्यामेव वेलायां चित्तनिर्वृतिः सैव वेला सर्वकार्येषु । ५५
१६ तपसो हि नास्ति असाध्यं नाम किञ्चित् । ६२
१७ सर्वाभिवाञ्छितप्राप्तिस्तु महतः पुण्यराशेः फलम् । ६७
१८ अनतिक्रमणीया नियतिः । ७१
१९ किमिव हि दुष्करम् अकरुणानाम् । ७४
२० अतिकष्टासु दशासु अपि जीवितनिरपेक्षाः न भवन्ति खलु जगति प्राणिनां वृत्तयः । ७४
२१ प्रायेण अकारणमित्राणि अतिकरुणार्द्राणि सदा खलु भवन्ति सतां चेतांसि । ७५

२२ नास्ति जीवितात् अन्यत् अभिमततरम् इह जगति जन्तूनाम् । ७४
२३ पुण्यानि हि नामग्रहणान्यपि महामुनीनाम्, किं पुनर्दर्शनानि ? ७६
२४ सर्वथा धिक् विधातारम् असदृशसंयोगकारिणम् ! ८६
२५ सर्वः एव हि अविनयप्रवृत्तः अनुतापाद्विना न निवर्तते । ८७
२६ यत्रैव निरतिशयं संपत्सुखं तदेव वनमपि भवनम् । ९०

TYPOGRAPHICAL ERRORS

(found in some of the copies.)

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१०	२०	ण्डरीकप्रीत्या	पुण्डरीकप्रीत्या
२५	५	अभिषिषच	अभिषिषेच
२५	१२	मेरुशङ्गं	मेरुशृङ्गं
३९	१२	कुमदनाथयोः	कुमुदनाथयोः
४४	३	तद्वार्ता	तद्वार्ता
५४	१४	गहीत्वा	गृहीत्वा
५७	१६	येन	येन इयम्
५७	१७	तरलिका	तरलिकाम्
७६	३	कमण्डंलु	कमण्डलुम्
८६	२१	क्रूरजातिजा	क्रूरजातिजा
८८	१२	समेव	सममेव
९३	१	Produeod	produced
९४	९	विटपै	विटपैः
९४	२०	ह्रदे	ह्रदे
९५	२०	दुखितः	दुःखितः

Opinions

Prof. P. V. Kane, M. A., LL. M., Bombay, writes:—

स्वस्ति। श्रीमुम्बापुरीतः नवरेसमुपाख्याः नीलकण्ठरावाख्याः सादरं विज्ञाप्यन्ते। संस्कृतवाङ्मयललामभूतायाः कादम्बरीकथायाः सारात्मकं पुस्तकं मुद्रितप्रायं यद् भवद्भिः कृपया प्रेषितं तत्सम्यङ् निरीक्ष्य महान् मे संतोषः सञ्जातः। शापप्रतिशापसङ्कुलेयं कथा भवद्भिस्तथाऽत्र प्रदर्शिता यथा वाचकानां हृदि वैशद्येन स्थितिमायाति। भट्टबाणस्य लेखनशैली सम्यगनुपालिता किन्तु दीर्घसमासरचना विसृष्टा। शब्दानां संहितामप्रदर्श्याभ्यासिनां महानुपकारः कृतः। एवमिदं पुस्तकं सर्वैः संस्कृतभाषामन्दिरान्तःप्रविविक्षुभिः शिरोधार्यमिति प्रतिभाति। इत्यलम्

भवदीयः

पाण्डुरंग वामन काणे

[पुण्यपत्तनस्थसरपरशुरामभाऊकॉलेजवर्तिनां प्रो. के. ना. वाटवे, एम्. ए. इत्येतेषां संस्कृत-महाराष्ट्री-प्राध्यापकानामभिप्रायः]

प्रथिततरं एव एतद् गीर्वाणवाणीरसिकानां यत् कविप्रवरस्य बाणभट्टस्य "कादम्बरी" अद्भुतकथा विरचनाकौशलेन, विविधरसोत्कटतया, तैः तैः च शब्दार्थालङ्कारादिभिः काव्यविशेषैः प्रायेण सर्व-कथातिशायिनीति। भट्टमहाभागस्य वश्यवचस्त्वं तावत् पण्डितप्रकाण्डैः गोवर्धनाचार्यैः आगलभ्यमधिकमाप्तुं वाणी बाणो बभूवेति वचसा सानन्दं उररीकृतम्।

परं इमे एव कादम्बरीगुणाः बालानां तथा च सुखप्रवेशैषिणां प्रौढानामपि दोषतां प्रतिपद्यन्ते। तथाहि कथोपकथाजाल-

जटिलता संदर्भं त्रोटयति । वर्णनप्रदीर्घता बुद्धिम् आयासयति । समासभूयस्त्वं गद्यजीवितत्वेन प्राचीनानाम् अभिमतम् अपि अर्थजातं तिरोदधाति ।

एतदध्ययनप्रत्यूहभूतानां दोषाणां निरासेन मम सुहृत्तल्लजैः नवरे-महाशयैः विनिर्मिता इयं सुलभा 'कथा' विद्यार्थिनां बहु उपकरिष्यतीति दृढं प्रत्येमि ।

प्रायशः येन कालक्रमेण कादम्बरीगताः कथाप्रसङ्गा समजायन्त तमेव समवलम्ब्य संपादिता इयं नूत्ना विरचना सौलभ्य-दायिनी नवरेमहोदयैः । यद्यपि क्वचिद् वर्णनविस्तरः लघुतां नीतः, क्वचिद् वचसां दुर्बोधत्वं दूरीकृतं, क्वचिदपि च कथासंधानम् अपि व्यधायि तथापि सर्वत्र बाणभट्टस्य सा एव सरसमधुरा वाणी समुल्लसन्ती दरीदृश्यते ।

एवं वैशद्यमापादिता बाणस्य "कादम्बरी" संक्षिप्तकथारूपे अस्मिन्नवतारे अन्येतृणाम् अधिकतरम् आह्लादकारिणी भूयाद् इति आशास्ते

विद्वद्वशंवदः

के. ना. वाटवे

श्री. राजाराम दामोदर देसाई, बी. ए. संस्कृतप्रवेशकर्ते पुणेः—

श्रीयुत नीळकंठ शंकर नवरे, बी ए., बी. टी. यांनीं लिहिलेली 'संस्कृतकादंबरीकथा' मी वाचून पाहिली आहे. आपल्या 'मराठी कादंबरीकथे'च्या धर्तीवरच त्यांनीं ही लिहिली असल्यानें तिच्याप्रमाणेंच हींत कथानकाचा सुबोधपणा व सुटसुटीतपणा साधला आहे हें सांगावयास नकोच. अगदीं अवश्य तेवढाच फेरफार करून बाणभट्टाच्याच शब्दांत ही कथा सांगितली आहे. अर्थात् मूळ कादंबरीच्या भाषेची माधुरी व चित्तवेधकता हींत पूर्णपणें उतरली

आहे आणि केवळ पाल्हाळाला व प्रदीर्घ समासांना चाट मिळाली आहे. हें समग्र पुस्तक विद्यार्थी मोठ्या उत्सुकतेनें वाचतील यांत शंका नाहीं. हायस्कुलांतील ६ व्या व ७ व्या इयत्तांना हें उत्कृष्ट वाचनपुस्तक होईल.

Prof. **G. P. Patawardhan,** M. A., (formerly Professor of Sanskrit S. P. College, and retired Head Master, H. D. High School, Sholapur.) ;—

I am glad to congratulate Mr. N. S. Navare on the successful attempt he has made in bringing out his book the Sanskrit Kādambarī Kathā, to present the master-piece of Bāṇa to the young reader in a form which makes the reading of Sanskrit a pleasure and an attraction. A real understanding and appreciation of Bāṇa's great work needs such a degree of scholarship and patience that the average student of Sanskrit usually shuns the task of studying that author as beyond his capacity. But Mr. Navare has so re-arranged the narrative and so simplified the diction of the author that the name of Bāṇa need have no terrors even to a novice in Sanskrit literature. Moreover the rearrangement of the narrative according to the chronological order is such a happy idea that for this reason alone, if not for any other, the book should make a distinct appeal even to more advanced students of Sanskrit.

I hope that the book will meet with a warm reception, which it so richly deserves, from teachers and students alike. I may also suggest that Mr. Navare should hereafter publish similar adaptations of Sanskrit classics which will go a long way, I am sure, in popularising the study of that language.

Mr. G. K. Modak, Sanskrit teacher, New English School, Poona. :—

I have gone through the whole of your book 'the संस्कृत-कादम्बरीकथा'. I am glad to say that the book is an intelligent and successful attempt in helping students to understand with ease the most complicated tale named कादम्बरी in Sanskrit. Among its many merits, I may mention the following few. (1) The captions of the several chapters of the book used by you are most appropriate and catching. (2) The arrangement of the events of the story in the chronological order, though it is less artistic and less fascinating than the original one used by बाण, will materially help the student in unravelling the bewildering complication of the plot. (3) The small size to which you have reduced the bulk of the story is sure to encourage the student in the reading of the story, which in the original rather repels him from an attempt to read, by its vastness and long chains of compounds. (4) The notes added by you are mostly to the point and free from the fault of verbosity. They of course from their conciseness will not tend to make the student idle and place him above the need of using a dictionary or exercising his brains. In conclusion, I can safely say that a study of this Book will prove both interesting and useful to the student of Sanskrit and will amply reward his labour by the enjoyment which the story in the simplified form in this book is sure to afford.

नी. शं. नवरे, बी. ए., बी. टी. यांचीं इतर पुस्तकें; मुंबई, वऱ्हाड व मध्यप्रांत आणि बडोदें सरकारनें मंजूर केलेलीं—

१ संस्कृत कवींचीं नाटयकथानकें (सचित्र द्वितीयावृत्ति किं. ८१०) या पुस्तकांत शाकुन्तल, विक्रमोर्वशीय, मुद्राराक्षस, वेणीसंहार, स्वप्नवासवदत्त, मृच्छकटिक व उत्तररामचरित या नाटकांचीं संविधानकें, मुळांतील स्वारस्य व सौंदर्य कायम ठेवून, मराठींत सुबोध व चटकदार भाषाशैलीनें ग्रथित केलीं आहेत.

२ मराठी कादंबरी-कथा (सचित्र द्वितीयावृत्ति किं. ८१०) या पुस्तकांत बाणभट्टकृत कादंबरीच्या कथानकाची गुंतागुंत कुशलतेनें सोडविली असून मुळांतील मोहकता व माधुरी कायम ठेविली आहे. 'संस्कृतकादंबरीकथा' वाचतांना या मराठी पुस्तकाचा फार उपयोग होतो.

३ मराठी रघुवंशकथा:—(किंमत १ रु.) यांत कालिदासकृत रघुवंश काव्याचें समग्र कथानक तेहतीस गोष्टींच्या रूपानें सहज सुंदर मराठींत उतरिलें आहे. कथानकाबरोबर मूळ काव्याच्या सौंदर्याचाहि आस्वाद घेतां येतो. शिवाय, आरंभीं कालिदासाचे एकान्तिक अभ्यासक श्री. के. ल. ओगले, बी. ए. यांनीं कालिदास व त्याचीं काव्यें याविषयीं विवेचक असा उपोद्घात लिहिला असून तो अभ्यासकांस अत्यंत उपयुक्त आहे. मुळांतील संस्कृत सुभाषितें त्या त्या ठिकाणीं पायटीपांतून दिलीं असून शेवटीं तीं एकत्रित केलीं आहेत.

कांहीं शाळांतून हीं पुस्तकें पुरवणीवाचनासाठीं लाविलेलीं आहेत. मराठी भाषेंत अशा प्रकारचीं पुस्तकें हीं पहिलींच असून तीं विद्वन्मान्य झालीं आहेत. शाळा-कॉलेजांतील विद्यार्थी व इतर जिज्ञासु वाचक यांसहि तीं उपयुक्त, बोधप्रद व मनोरंजक आहेत.

